PRACHYAVANI SANSKRIT TEXT, VOL XL.

डक्टर श्रीयतीन्द्रविमल-चतुर्धुरीण-विरचितं

॥ भारत-विवेकम् ॥

The Bharata-Vivekam

(On the holy life of Swami Vivekananda)

by

Dr. Jatindra Bimal Chaudhuri,
Secretary, West Bengal Govt. Sanskrit Siksha Parisad.
(formerly, Principal, Govt. Sanskrit College, Calcutta; Head of the Dept. of Sanskrit, Presidency College, and Lecturer, London University) ;

Author of several series of Original Research Works : (1) Contributions of Women to Sanskrit learning ; (2) Contributions of Muslims to Sanskrit learning ; (3) Sanskrit Duta Kavya Literature ; (4) Sanskrit Historical Kavya Series, etc.

CALCUTTA, 1963.
(Swami Vivekananda Centenary Celebration Year)

Published by Dr J B Chaudhuri,
For PRACHYAVANI
(Institute of Oriental Learning)
3, Federation Street,
Calcutta 9

Available at —
'PRACHYAVANI'
3, Federation Street, Calcutta 9

SANSKRIT PUSTAK BHANDAR'
38 Cornwallis Street, Calcutta

'DAS GUPTA & CO'
54/3, College Street, Calcutta

'CHOWKHAMBA SANSKRIT SERIES OFFICE'
Baneras City

'MUNSHIRAM MANOHARLAL'
P Box No 1165, Nai Sarak, Delhi 6

'MOTILAL BANARSI DAS'
P. B 75, Chowk, Baneras City
Or,
Jawaharnagar, Delhi

Printed by
Dr Jatindra Bimal Chaudhuri
at the PRACHYAVANI PRESS,
3, Federation Street,
Calcutta 9

FOREWARD

We are, indeed, very thankful that at long last, we are able now, through the grace of the Holy Mother, the first volume of our humble Series on the sublime life and teachings of Swami Vivekananda. The Series consists of two Sanskrit Dramas, called "Bharata-Vivekam" (1881-1393 A. D.) and "Visva-Vivekam" (1893 1902 A.D.), composed by my humble self, as my humble 'Arghya' or offering at the holy feet of Swamiji on the occasion of his supremely auspicious Birth Centenary.

The Dramas have been completed long ago; but due to printing difficulties, could not be brought out before. The "Bharata-Vivekam" has also been staged a number of times by Pracyavani Sanskrit Pali Dramatic Troupe, as follows :—

1) Under the auspices of Visvarupa Theatre, a leading Dramatic Concern of India on 2-11-62, A large number of Monks of Ramkrishna Mission, Belur Math, and Nuns of Sarada Math, Dakshineswar, graced the function (on the occasion of Swami Vivekananda Birth Centenary).

2) Under the auspices of All India Bengali Literary Conference at Gorakhpur, on the occasion of its 24th and Swami Vivekananda Session, on 28 12 62.

3) Under the auspices of the Trustees of Mahajati Sadan, with Sri P. C. Sen, Chief Minister, Govt. of West Bengal, as President. On the occasion of the Birth Centenary of Swami Vivekananda on 17-1-63.

4) Under the auspices of Ramkrishna Vedanta Math of Swami Prajnananda on the occasion of Birth Centenary of Swami Vivekananda, on 19-1-63.

5) Under the auspices of Vivekananda Society, Shyam Square, Calcutta. On the same occasion on 26-1-63.

6) Under the auspices of Ramkrishna Vivekananda Ashram, village Pairadanga, Nadia, W. Bengal, of Swami Sevananda Puri on 9 2 63.

7) Under the auspices of Ramkrishna Ashram, Nim pith, 24 Parganas, W. Bengal, of Swami Buddhananda on 25 2-63.

8) Under the auspices of Baranagar, Ramkrishna Sevashram of Swami Satyananda on 25-2-63.

9) Under the auspices of Saraswati Bihar of Raghu Vira and Ramavana Vidyapith of Sri J. Dalmia, at Constitution Hall, New Delhi on 13-4-63.

(To be Staged as fixed)

10) Under the auspices of the Maharastra State Swami Vivekananda Birth day centenary Committee at Sundar bhai Hall Bombay on 26 10-63

11) Under the auspices of Sri Aurobindo Ashram Pondichery on 30-10-63

12 Under the auspices of Swami Vivekananda Centenary Committee at Barrackpore on 18th Oct '63

13 Under the auspices of Burnpur Bharati Bhawan on the 24th November, 1963

14 Under the auspices of Purulia Swami Vivekananda Centenary Committee, on the 25th November, 1963

Through the grace of the Holy Mother, thousands attended our functions on every occasion and highly appreciated the same very graciously

We are very grateful to Srimat Swami Sambuddhananda to whom the whole country, nay, the whole world is immensely grateful for his untiring efforts for making the world wide Swamiji Birth Centenary functions a great success

We humbly pray to Swami Vivekananda to accept this as our very small token of reverence and devotion We also pray to all to forgive us for all our faults and failings generously

PRANAM

PRACHYAVANI
(Inst of Oriental Learning)
3 Federation St, Cal 9
Dated, the 20th Oct 1963

'Jatindra Bimal'

BLESSINGS

I am very glad that Dr Jatindra Bimal Chaudhuri, the well known Sanskrit Scholar, Dramatist and Poet, has brought out this beautiful Volume on Srimat Swami Vivekananda, on the occasion of his Holy Birth Centenary Swamiji, as is well known, was a great protagonist of Sanskrit Learning Culture and Civilization, and so it is very fit and proper that a Sanskrit Drama on his sublime life is being published for the first time

The Drama deals with some main incidents of Swamiji's life from his first meeting with Sri Ramkrishna Paramahansa Deva to his leaving for the Parliament of Religions in Chicago (1881 A D—1893 A D) What strikes us most here is the intense spirit of reverence and devotion manifest in every line of the work This has, indeed made the work a Puja an Arghya at the holy feet of Swamiji

The language is very sweet and simple yet poetic and dignified The beauty of the work has been much enhanced by the inclusion of a large number of sweet verses and songs in different metres and tunes

It is indeed very difficult to compose a biographical drama For the drama must be a true History, but be not dry Again it must be a real work of Art and Poetry, yet free from exaggerations So it goes to the great credit of Dr Jatindra Bimal that he has been able to combine Fact with Poetry in a manner at once scientific and sweet.

This excellent volume should be in the hands of all and on the shelves of all Libraries in India and outside

We eagerly wait for the Companion Volume on Swamiji called Visva Vivekam dealing with the rest of his sublime life upto May, 1902

Our Blessings to Jatindra Bimal for his noble efforts to popularise Swamiji's sublime teachings amongst all through the medium of a language which is still to-day the most revered most loved and most universal language of India

SWAMI SAMBUDDHANANDA

General Secretary,

Vivekananda Centenary Committee (Central)
and President, Ramkrishna Mission
Ashram Bombay

Belur Math
Howrah.
20 10 63

SUMMARY OF BHARATA-VIVEKAM ACT BY ACT

PRASTAVANA (Prologue)

Nandi-singer, Sutradhar (Stage Manager), Nati (Main Actress)

The Sutradhara and the Nati discourse about the theme of the Drama to be staged The Sutradhara explains to the Nati the great glory and supreme excellence of the holy life of Swami Vivekananda Ordinarily it is found, he points out that one lamp lights up another, but it is very rarely that a whole series of lamps is lit up by a single one But from Sri Ramkrishna to Swami Vivekananda from Swami Vivekananda to Sister Nivedita, from Sister Nivedit to posterity,—what a glorious series of lamps lit up beautifully from a single, sublime lamp Sri Ramkrishna

SCENE I

Place—House of Surendranath Mitra Simulia, Calcutta 1881

Time—Night, 7 p m

Suendranath, Sri Ramkrisna, Narendranath

First meeting between Sri Ramkrishna and the young singer Naredranath at the house of Surendranath Mitra Calcutta,—a supremely auspicious moment for the whole world At the very first sight Sri Ramkrishna joyfully knows Narendranath to be the fittest message-bearer At the very first sight, Narendranath feels, inevitably attracted towards Sri Ramkrishna —but fails to know him as he really is—an Avatara or Incarnation of God Himself

SCENE 2

Surendranath, Narendra, Friends

Place Dakshineswar Temple Time Forenoon,

Narendranath is much attracted by Ramkrishna Paramahansa and consequently he accompanies one day Surendranath Mitra and his friends and comes to the Holy Temple of Dakhineswar The discourses of Sri Ramkrishna Paramahansa attract him everso more

Paramahansadeve praises Narendranath before Kesavachandra and others Narendranath vehemently protests and therefore, Paramahansa, a bit agitated, verifies the truth of his statements, as he used to do, by praying to the Goddess Kali He again re-confirmed that whatever he said was absolutely right and Narendranath was simply incomperable among men

SCENE 3

Place Holy Temple of Dakshineswar

Time Morning

Ramkrishna Paramahansadeva and Sri Narendranath

Narendranath was feeling much dejected and worried, because nobody could affirm on personal knowledge that God was visible He approached in this connect on Maharsi Devendranath as well, but was disappointed But the straight, sincere reply of Sri Paramahansa to his query if God were *visible, at once removed all doubts of Narendranath* Paramahansa told him outright that God was not only visible, but could be seen more conspicuously and from a nearer angle than he visited Narendranath (Sarvada drisyate purnam tvattopi spastato *hi sah, p 21)* From this day Narendranath completely surrendered himself to the divine will of his Lord Paramahansadeva

SCENE 4

Place Sri Ramkrisna's room at Daksineswar Bhavatarini Temple

Time—Morning

Sri Ramkrishna, Narendranath

An intimate conversation between Sri Ramkrishna and Narendranath After years of testing Narendranath, finally, accepts Sri Ramkrishna as his Guru unreservedly But moved at his poverty and domestic troubles, kind hearted Sri Ramkrishna advises him to go to Mother Bhavatarini, and ask worldly wealth from Her Accordingly, Narendranath approaches the Mother three times but

comes back three times without asking for any such thing

SCENE 5

A Farce (Viskambhaka)

Place—A Village road at Dakshineswar Time—Morning

A match-maker, a barber, a Gardener

These three jokingly discuss amongst themselves the proposal of marriage of Narendranath

The Scene Changes

Place—Room of Ramkrishna at Daksineswar Kali Temple

Time—1885 11th March,

Sri Ramkrishna, Narendra, Girisa Harihara, Balarama, Master Mahasaya,

Sri Ramkrishna Paramahansadeva (1885 A D) wants Narendra and Girish to discuss about the Incarnation of God Sri Paramahansa thus imparts his instructions to his beloved disciples He tells Brahma and Kali are one and the same and during the training period in particular, his devotees must be very watchful and particularly careful

SCENE 6

Place—Garden House at Kasipore, Calcutta 1886

Time—Evening

Sri Ramkrishna, Doctor Sarkar, Sri Saradamani, Narendranath

Just before leaving his mortal coils Sri Ramkrishna enjoins Sri Saradamani to carry on his work ; and, at long last, reveals himself to Narendranath as an Avatara

SCENE 7

Place—Ghusuri Village, West Bengal

Time—Morning.

Sri Saradamani, Golapamba, a village girl, Swamiji

Before going on a pilgrimage to all over India, Swamiji comes to Ghusuri-Village to ask Mother's permission "I will not return, till Sri Ramkrishna's wishes are

fulfilled"—with this firm resolution in mind, and blessings of the Holy Mother he starts on a tour of the whole of India, to get acquainted with her soul directly.

SCENE 8

Place . Palace of Maharaja of Alwar

Time : Morning, February, 1891.

Maharaja of Alwar, Dewan, Swamiji.

During his pilgrimage tour, Swamiji arrives at Alwar palace and meets the Maharaja there. Maharaja expresses himself against Idol-Worship, on the ground that idols are mere clay-dolls

At once, Swamiji asks the Dewan or Prime Minister to spit on a photograph of the Maharaja Naturally, the Dewan refuses to do so Then Swamiji explains the great truth, thus :— the photo is not the living man; yet, as it stands as the symbol of a man, naturally we refuse to spit on it. In exactly the same manner, the Image is the symbol of God Himself.

SCENE 9

Place · Limbadi, Guzrat. Time : Night.

Head of the Limbadi Group of so-called ascetics, his associate, a boy, Swamiji.

During his wanderings, Swamiji comes across a group of false Sadhus at Limbadi, Guzrat They threat to kill Swamiji, unless he agrees to sacrifice his Brahmacharya. But through the help of a boy, Swamiji is ultimately rescued by the Police sent by the Maharaja of Limbadi

SCENE 10

Place : Vivekananda Rock near Rameswara

Kanyakumarika Temple.

Time : Forenoon

Swamiji

Vivekananda as Parivrajaka roamed about the length and breadth of India and witnessed her real condition with his own eyes He was determined to remove the unearthly

poverty of India along with her Religious upliftment and all round development At that time it flashed upon his mind that he must ask for material help from the West

SCENE 11

Place House of Manmatha Nath Bhattachaya Madras
Time Forenoon
Swamiji Devotees Servant

Swami Vivekananda was anxiously watching for reply from the holy mother Sri Saradamani Devi to his letter He saw a dream from which he concluded that his Guru Sri Paramhansa permitted him to go to the West for fulfilling his mission the spread of Indian cultural heritage throughout the world But Swamiji was determined not to move an inch in that direction without the permission of the Holy Mother This he got and he at once made up his mind to go to the West

SCENE 12

Place Palace of the Maharaja of Khetri
Time Evening 1893
Maharaja of Khetri other kings court dancer Swamiji
Reception of Swamiji at the palace of Khetri Maharaja

Over joyed at the birth of a son after a long time through Swamij s grace the Maharaja of Khetri invites Swamiji to his palace to express his gratefulness to him He desires very much to entertain Swamiji by the exhilarating songs of his celebrated Court dancer But being a Sannyasin Swamij at first refuses to attend Later on however he is pleased with the intensely devotional songs of the Court dancer and blesses her

The Maharaja makes all arrangements for Swamiji s proposed journey to Chicago to attend the All World Parliament of Religion He requests Swamiji to assume the name of Vivekananda which Swamiji graciously agrees to do

—o—

भारत-विवेकस्य अकारादि-वर्णक्रमेण

श्लोकसूची

	पृ॰	श्लो॰
'अ'		
अगौरवं दूर	८०	२३२
अङ्गुष्ठसम्मिता	४६	१३४
अनन्य मन्दिर	६०	१७१
अदूरे प्रवहति	४०	१२१
अनन्त करुणासिन्धु	४६	१३३
अनुरागखरोद्दीप्तं	५	१२
अनवस्नहारा	६१	१७८
अमूर्तं महितं	४१	१२५
अवतार वरा	४८	१४०
अशान्तसागरः	६१	१७३
अहं क्रीडनकं	६६	१९६
अहर्निशमहं	३५	१०६
'आ'		
आत्मानमार्पयमहं	३८	११०
आध्यात्मिकादि	४३	१२९
आलेख्यमेतत्	५०	१४५
आविर्भूतोऽस्ति देवः	१२	३२
आशाघ्नते कोटि	७३	२११
आशाय काल	५६	१६२
'इ'		
इच्छाजातं तव	९	२४
इष्टदेवनाम	३९	११७
'उ'		
उत्ताले तोयधे.	६९	१९७
'ऊ'		
ऊर्मिमाला	३९	११५
'ए'		
एकतो जाह्नवी	७०	२०४
एकपार्श्वे हुलाया	६९	२०१
एकोऽपि दुष्टः	२	५
एतदीश्वरविश्वासि	१२	३३
एष मे परिवारस्य	६३	१८१
'क'		
कण्टकितवानने	६५	१८५
कण्टकैः कण्टक	२९	७३
कन्या कुमारीति	६०	१७२
करगतो ध्रुवमस्मि	५४	१५५
करिण बभासि	१०	२५
करुणा-वरुणागार	४८	१४१
कलम्बिकाशाकनिमानि	५३	१५४
कृत्वापि तातः	६३	१८२
कृपामयि वसुधा	७१	२०६
कोटि-कोटि-विश्व	७६	२२०
कोटिगुणमणि	५८	१६६
कोटिशो वन्दे	७७	२२२

	पृ	श्लो		पृ	श्लो
कोटिसूर्यसमुद्दीप्त	४८	१४३	'त'		
क्रीडलोलामिमालाया	६१	१७५	तत्राप्येष विशेषण	२	४
क्लिष्ट सम्प्रति	४१	१२३	तथेश्यमाप्तु विहिते	३३	१०१
क्वासि त्व स्वामिन्	६२	१७६	तदा सुतोऽनाथ इति	३७	१०८
क्षुद्रा मे तरणी	६१	१७७	तप पुञ्जसमुद्भूत	७७	२२४
क्षुर करे शाणित	२८	७१	तवोन्मादकारागारे	२७	६६
क्षेत्रे क्षेत्रे श्यामला	६६	१८७	तलस्य तलमारयात	६	१५
'ग'			तस्याशिषा तनय	७४	२१३
गच्छ वत्स पितृस्थान	१६	५०	ताप पाप दु खदैन्ये	८	२०
गुरुवयस्य माहात्म्य	६	१७	तावद् भोजनमन्दिरे	३३	१००
गुरोराशीर्वच काम्य	६६	१६६	तीरे क्वापि भाति	३६	११६
गृहशतशत-	४	६	तुहिनशैल	६८	१६३
गैरिकवसन धृत्वा	४७	१३६	त्रातारौ भुवनस्य	३०	७५
ग्रहा उपग्रहा सर्वे	४३	१२८	त्रेतायामवतारो यो	३८	१११
ग्रामोऽस्मदीयो	४१	१२४	त्व त्रिभुवननाथ	२१	५४
'घ'			त्व हि सन्ध्या त्व	२३	५६
घटकाय निवेद्याहो	२६	७४	त्वद्दत्तामधिगम्य	३६	११२
घटके घटनावृत्ति	३०	७७	त्वन्मन्त्रप्रतिसस्कृतेन	३६	११३
घटना कठिना जाता	३०	७६	त्वमम्ब सन्ध्या त्व हि	१८	४६
'ज'			त्वमसि जले तथैव	१८	४८
जननि मम त्व हि	१७	४७	त्वादृग् गुरुविपुल	२२,२४	५६,६१
जननी सारदामणि	६७	१८६	'द'		
जयति जयति यतिजन	४	८	दयस्व दासा मयि	४०	१२२
जय प्रभो जय	६८	१६४	दारिद्र्यादिसमुद्भवेन	२४	६२
जानीहि मन कोऽपि	१७	४३	दास स्वापत्यबुद्ध्या	३४	१०३
जीवन-नदी मम	३६	११४	दिनत्रय चतुष्टय	१७	४५
ज्ञानादि-पञ्चपुष्पाणि	७१	२०७	दिनेश-कोटि-प्रभयेव	७७	२२३

	पृ:	श्लो:
दीपाद्देदीप्यते दीपो	३	६
दुःखैकमञ्जनप्राण	३४	१०२
देवोऽभवन्मम् यदा	७८	२२६
दैन्य-सागरमग्नस्य	२३	६०
दोषे च गुणे भव	७५	२१७
'घ'		
धन्योऽहं चिरकल्याणो	२६	६७
धरणीसकलधर्मं	७७	२२१
धरातलेऽस्मिन्	५१	१४८
धर्मस्तवैषनिजरूप	४२	१२६
धारिणि जननि	६५	१८४
धृतभवानीनाम	३५	१०५
'न'		
न भव देव मम	७५	२१६
नमः श्रीकृष्णचन्द्राय	४८	१३६
नरेश तव मानसं	७६	२२८
न वाक्षराणां न च वा	१०	२७
नहि मुद्रा ग्रहीतव्या	६४	१८३
निर्यानुष्ठानं	६२	१८०
निशीथिन्यामस्यां	५५	१५७
नीरन्ध्रच्छे भवने	५७	१६४
नैसर्गिकनिर्झर	१०	२६
'प'		
पद्भ्यामटन् निखिल	६०	१७०
परमकरुणाखनि	५४	१५६
पिकरुते वसन्तस्य	६६	२०३

	पृ:	श्लो:
पुण्यविमण्डन	४५	१३२
पुण्यश्रीके भारत	७१	२०५
पूर्वं प्रसाद्य तपसा	७४	२१४
पृष्ठे निबध्येष्टक	१४	३६
प्रतिसरः कमलानि	६६	१८६
प्रभो न गणय	७५	२१५
प्रेमायमक्षयोऽस्तु	६८	१९२
प्रेमा लोकर्लङ्घ्यलद्रि	६७	१९१
'भ'		
भगवन्तं भवान् कश्चित्	२०	५१
भविष्यति दिनं मे किं	२१	५३
भागवतकृपावल	२६	६६
भारतश्री-विवेकाय	१	२
भूषा गुरोः शतसहस्र	७८	२२७
भूयोऽपि वच्मि यदहं	७७	२२५
भो आनन्दमयि माता	३५	१०४
'म'		
मथुरानगरे गृहे	४७	१३७
मथुरामरण-मोदन	५२	१५०
मधुर कोमलाकार	४८	१४२
मनश्चल स्वीयनिकेतनम्	१४	३७
मनश्चिन्तयात्मविकासनं	२५	६४
मनो निभृतं पश्य	६	२१
मनो मेऽहर्निशं पश्य	६	२२
मम भव-नाविक	६१	१७६
मर्यादा शाश्वती	६१	१७४

	पृः	श्लोः
महानसो विज्ञतमः	७२	२०६
मां कुरु वद्धवाहुलं	२६	६८
मातस्ते कृपया	५	११
माता ध्यानं तथा	६६	२००
मातुरादेशे मत्ति	६७	१६०
मातु में सारदामणेः	५८	१६५
मातृनाम मे संवलं	५८	१६७
मातृमणे त्वां नमामि	४५	१३१
मा भूत् सम्मानहानिः	७३	२१०
मालयचामरोपेता	४०	१२०
माहात्म्यमुत्सवस्याहो	७२	२०८
मुहुः सौदामिनी	६	२२
मेलनक्षणो मङ्गलः	१०	२८
'य'		
यत् सत्यमेवन्निखिले	८०	२३१
यथा हि शर्कराखण्डं	१३	३४
यदि पथि कोऽपि	१५	४२
यदुपरि समुदेति	३८	१०६
यद् ब्रह्मचर्यं स	५६	१६१
यन्त्रमहं यन्त्रिणी त्वं	१०	२६
यमुनाहृदयशोभि	७५	२१८
यस्याः कृते चिन्तनं	१७	४४
यानक्षेत्रवान् भवान्	७६	२३०
युगे युगे भारत	२	३
योगादिनियथा	३६	१०७
'र'		
रथोऽहं गुरुदेवस्य	६६	१६५
राज्ञः कृतज्ञो भृशमस्मि	५८	१६८
रामकृष्णमताम्भोधि	१	१
रास-सुशोभन-रस	५२	१५२
'ल'		
लोभमोहादिकः पथि	१५	४०
'व'		
वञ्चयित्वा कामादिकं	३१	६८
वरिष्ठ-शिष्यः किल	७३	२१२
वहति समीरणः	२५	६५
विज्ञायापि विभेदमस्य	५१	१४७
विधाय कर्णोपरि	२८	७२
विफला ते भवेदाशीर्न	५७	१६३
विषयपञ्चकं तथा	१४	३८
विस्तार्य झिल्लिकारावैः	५	१३
विहाय कार्याणि	४६	१४४
वैद्युतमालिकास्तम्भः	३	७
'श'		
श्रान्ति-क्लान्ति-भ्रान्ति	८	१६
श्रीनन्दनकानन	११	३०
श्रीमन्तो ननु चिन्तयन्तु	५०	१४६
श्रीराधारमण	५२	१५१
श्रूयते मङ्गतो चित्तं	८	१८
श्वेताम्बरा वरारोहा	४०	११६

	पृः	श्लोः		पृः	श्लोः
'स'			सा साम्प्रतं तिष्ठति	६६	१८८
सत्यं नारायणस्त्वं	१७	४६	सुधा क्षरतु लोके	३६	११८
सत्यं वच्मि नरेन्द्राय	२१	५२	स्त्रियो देवाः स्त्रियः	५६	१५६
सत्पथे कुरु	१५	३६	स्वप्रार्थं नु प्रहीष्यामि	६६	१६८
सदाऽकारण-कृपा	४	१०	स्वर्गे नूनमत्तमेला	२७	७०
सदा चञ्चला राधिका	१३	३५	स्वीयप्राणप्रियम्	४७	१३८
समाश्वास्या देवैरपि	७६	२२६	स्वीयेच्छया वाथ	५५	१५८
सयत्नं कुरु हृदये	३१	६७	'ह'		
सर्वत्रास्ति जले स्थने	२३	५८			
सर्वमस्य मनोहारि	५	१४	हास्यरेखा जनन्यास्च	६६	२०२
सा चेत् प्रसीदति	२४	६३	हृदय कुटीरद्वारं	२१	५५
साधुसङ्गनाम्ना	१५	४१	हृदये मौक्तिकी	६	१६
साधो क्षमासार	५६	१६६	हे मधुसूदन मुरली	५२	१४६
सार्थकं जन्म मे मातः	४३	१२७	हे मधुसूदन राधा	४६	१३५

—o—

॥'भारत-विवेकस्य छन्दसां सूची ॥

अनुष्टुप् — १, २, ४, ६, ७, १२–१८, ३३, ३४, ५०–५२, ६०, ६७, ७३, ७४, ७६, ७७, १११, ११९–२०, १२७–२८, १३९–४३, १५९, १६३, १७१–७५, १८१, १८३, १९५–२०४, २०८, २२४ ।

इन्द्रवज्रा — १९, २०, १२४, १५३, १५८, १६१, १६६, १९१, २११ ।

उपजाति — ३, ५, २७, १०१, १०८, १४५, १५४, १६४, १६८ १७२, १८२, २०९ ।

उपेन्द्रवज्रा — ७१, १४४, १४८ ।

इन्द्रवशा — ३६, १८८ ।

आर्या — १६२ ।

द्रुतविलम्बित — १५५, १८६, १९३ ।

उपगीति — १९२ ।

मात्राच्छन्द — ३५, १२१, १२५ ।

गीतम् — ८–१०, २१–२६, २८–३१, ३७–४९, ५३–५५, ५७–५९, ६४–६६, ६८–७०, ९७, ९८, १०२, १०४–६, ११४–१८, १३१–३२, १३३–३८, १४९–५२, १५६, १६५–६७, १७६–७९, १८४–८५, १८९–९०, १९४, २०५–७, २१५–२२ ।

शार्दूलविक्रीडितम् — ११, ६२, ७५, ९९–१००, १०७, ११२–१३, १२३, १४६–४७, २३० ।

शिखरिणी — १५७, १८०, २२९ ।

स्रग्धरा — ३२, १०३, २१० ।

शालिनी — १८७ ।

वसन्ततिलकम् — ५६, ६१, ६३, ११०, १२६, १२९–३०, १७०–७१, २१३–१४, २२५–२७ ।

वशस्थविलम् — ७२, १२२, २१२, २२३, २३१–३२ ।

मालिनी — १०९ ।

पृथ्वी — २२८ ।

—०—

भारत - विवेकम्

डक्टर- श्रीयतीन्द्र-विमल-चतुर्धुरीण-विरचितम् ।

रामकृष्ण - मताम्भोधि—मथनाचल—रूपिणे ।
सारदामणि-सौरन्याय युगान्तध्वान्त-हारिणे ॥ १
भारत - श्रीविवेकाय पुण्यधारा - प्रसारिणे ।
शतवर्षजयन्त्याख्य तस्मै नो नमो नमः ॥ २

(नान्द्यन्ते)

सूत्रधारः । अस्मिन् वर्षे स्वामि श्रील-श्रीविवेकानन्दस्य जन्मशत वार्षिकोत्सवे समापतिते, कलिकातास्थ-सुप्रसिद्ध - नाट्यालय - "विश्वरूपा" कर्तृपक्षीयैरादिष्टोऽस्मि—

जननी श्रीसारदामणि - पूर्णाशीर्वाद - फलस्वरूपस्य देववाणी - मधुर-भारतीय-कोटीकोटी-कल्याणमूर्ति जनसाधारण युगयुगान्त पुण्यार्जन फलरूपिणः श्रीरामकृष्ण धर्म दर्शन प्रचार-जगद्विमोहनस्य स्वामि-श्रीविवेकानन्दस्य पवित्र-जीवनचरितमवलम्ब्य किञ्चनाभिनव नाटकमस्माभिरभिनेतव्यमिति ।

तद् यथ कलिकातास्थ - प्राच्यवाणी-सदस्याः पश्चिम वग सर्वकारीय संस्कृत - शिक्षा - परिषद् यक्षेण डक्टर— श्रीयतीन्द्रविमल - चतुर्धुरीण विरचित संस्कृत नाटक "भारत-विवेक" प्रयोक्तुमुद्यता वर्तामहे ।

किन्तु कथं चिरायते मम नाट्यकर्मनिपुणा नटी ? अहो आनन्द सेत एवायाति।

देवि ! अपि सर्वं नेपथ्यकर्मादिकमत्रसितम् ?

नटी । भगवत्कृपया सर्वं नेपथ्यकर्म सुष्ठु सम्पादितम्।

सूत्रधार । भगवत्कृपयाऽथवा मा प्रति समादरहेतोरित्युच्यताम्।

नटी। देव। तत् सममेव। यन्त्रिभगवतश्च यन्त्राणि प्रयोजनीयान्येव। तत्र मुख्ययन्त्र भवानेव। पुन का वार्ता समादरस्य ? भवता प्राणस्पन्दन सममस्माकमपि, भवता स्फूर्ति समाऽस्माकमपि, भवता सम्माननमस्माकमपि तथा ।

सूत्रधार । अतएव सव कर्म त्वया सुष्ठु अपूर्व निष्पाद्यते । प्रेम हृदयवेद्य सर्वसत्तात्मकम् । स्थिरप्रम्णा यत् क्रियते तेन जगज्जीयते। एतच्च श्रीलश्रीविवेकानन्दस्य जीवनेऽपि प्रमाणीकृतम् । श्रीरामकृष्ण प्रति जननी–सारदामणि प्रति च प्रगाढ-प्रमैव स्वामि–विवेकानन्द-जीवनस्य सर्वसार्थकताना मूलकारणम् । भगवान् श्रीरामकृष्णस्तथाऽम्बिका श्रीसारदमणिर्वा यथैच्छत् तथाऽकरात् श्रील स्वामीजि महाराज ।

नटी। युगे युगे भारतवर्षतोऽस्माद्
गता हि दूता दिशि दिश्यनेके।
तैस्तत्र तत्र स्वमतप्रतिष्ठा
कृता विशेषा प्रतिभानुरूपम् ॥ ३
तत्राप्येष विशेषेण विवेकानन्द-सञ्ज्ञित ।
महाप्राज्ञो महासाधुर्वर्तते मूर्धनि ध्रुवम् ॥ ४

सूत्रधार । अवश्यम्भावि चैतत् । यत एकता यथा श्रीरामकृष्ण, अन्यतस्तथा माता सारदामणि । पित्रो श्रेष्ठ सन्तानाऽयम् । उभयो राशीर्नलेन स विश्वविजयी बभूव।

एकोऽपि तुष्ट प्रभुरामकृष्ण
का का न सिद्धिं मनुजाय दत्ते ।

मात्रा पुनः सारदयाऽपि तुष्ट्या
कृतप्रमादस्य किमस्ति वाच्यम् ॥ ५

नटी । पुनः न केवलमीदृशपित्रैरेवादृशः पुनः । पुनः सोऽपि निवेदिताप्रमुखाणां शिष्याणां वरणीयतमो गुरुरिति । अहो ! आश्चर्य-गुरुपरम्परा जगति ।

सूत्रधारः । देवि न केवलं तत्, अस्य महात्मनः सर्वमेव आश्चर्य-जनकम् । केवलं प्रार्थयामहे—तव प्रतिभावत्त्वेन अस्माकं प्रयोग-कौशलं सर्वेषां हृदयग्राहि भवतु । सर्वं विश्वं च नन्दतु । एष स्वामिमहोदयः कठोरसंकल्पः वज्रहस्तः प्रज्ञानाचम्पतिर्महासाधको देशप्रेमिकः सत्यं भुवनैकल एव । यस्य गौरवेण निखिलं जगच्चिरमुज्ज्वलं भविष्यति ।

दीपाद्दीप्यते दीपो नियमोऽयं सनातनः ।
दीपपरम्पराज्वाला नितरां विस्मयावहा ॥ ६

इत्यता तदाधुनिक-युगश्रेष्ठ-दीपावल्या मूल—

वेणुनमालिकास्तम्भः पुष्पोऽयं सनातनः ।
रामकृष्णाभिधायुक्तो विवेकानन्द-मोदितः ॥ ७

(इति प्रस्तावना) ॥

प्रथम - दृश्यम् ।

[श्रीश्रीपरमहंसदेवेन सह श्रीनरेन्द्रस्य प्रथमः साक्षात्कारः ।

स्थान—कलिकाता—सिमुलियाञ्चले श्रीसुरेन्द्रनाथमित्रस्य गृह

समयः—रात्रेः सप्त घटिका (ख्रीष्टाब्दः १८८१)

परमहंसदेवः, श्रीसुरेन्द्रनाथमित्रः भक्ताश्च]

परमहंसदेवः । मातः मातस्तुभ्य नमः ।

संगीतम्

जयति जयति यतिजनगति-जननी भवतारिणी ।
नियत-विहित-सुत-शत-हित-धन्य-मोक्ष-साधिनी ॥ ८
गृह - शतशत - विचरणरत–कोटि–दुःखहारिणी ।
ममता-घन-स्मरणयन-तृषित-शान्तिकारिणी ॥ ९
सदाऽकारणकृपाकारिणी ।
तनय-तनय-पुण्य-विनय-धन्यं मां कुरु जननि ॥ १०

मातः ! जगतः शतशत-क्लेशा मम हृदयं विदारयन्ति । त्वं कृपया साधनरत्नं मां विज्ञापितवती । किन्तु कुत्र ममोत्तरसाधकाः ? उत्तरसाधकनित्यदर्शनलालसा हृदयं मम निरन्तरं क्लिश्नाति ।

सर्वमङ्गलमङ्गल्ये सर्वार्थसंसाधिके सर्वभूतनिवेशिनि धरित्रीशान्तिदायिनि जगज्जननि ! कुत्र मम शिवसमोत्तरसाधकाः यदर्थमहं निरतमरोदम् ।

मातः ! गतिहीना नदी मरुभूमौ नश्यति ; वारिहीनो वर्षाकालः

धरित्रीवक्षः शोषयति । एवमुत्तरसाधकहीना मम साधना कथं जीवेत् ? भारतीयाभारतीयसर्वसाधना मयाऽभ्यस्ताः ।

मातस्ते कृपया मयाद्य विहिता या साधनस्योन्नतिः
धर्मश्चापि निरूपितः शिवतमो यः सर्वसाधारणः ।
तत्त्वं यत्र तवानुभूतमियता कालेन बालेन ते
तन् सर्वं किमु सम्प्रदायविरहाल्लुप्येत मत्तः परम् ॥ ११

सुरेन्द्रनाथमित्रः । (स्वगतम्)

अहा ! मधुरेयं सन्ध्या ।

अनुराग-परोदीप्तं दिवानिशासखीद्वयम् ।
मिलनरागसंफुल्लं श्लिष्यतीव परस्परम् ॥ १२
विस्तार्य झिल्लिकारावैरानन्दमधुभाषितम् ।
रक्तायते निमेषाय सिन्दूरैर्गगनाङ्गनम् ॥
विरहग्लानिमापन्नं क्रमाद्यात्यधिकान्तरम् ॥ १३

अहो तत्र पुनः गुरुदेवस्य अनिर्वचनीय-महिमा । यत्रैव एष तिष्ठति, तत्स्थानं क्षणाज्जायते देवमन्दिरसदृशम् । शरीरादस्य निरन्तरं प्रसरति ज्योतिर्धारा, वाक्यान्निर्गलति निरन्तरमजस्रमिक्षुरसुनीधारेव सुधा, हास्येन निःसरति तरुणकिरणराशिः ।

अहो ! सौभाग्यमस्माकम् । किमधिकम्—

सर्वमस्य मनोहारि सर्वं दिव्यसुखास्पदम् ।
विचित्रं सर्वमेवास्य योगसिद्धमहात्मनः ॥ १४

रामकृष्णः । जननि भवतारिणि ! दयस्व जननि, मयि दयस्व । नितान्तत्वच्छरणे पुत्रे कीदृशस्तेऽयं व्यवहारः ? कृपामधुरे महामातः ! ममतामधुरं प्रेषय ममोत्तरसाधकम् । कोऽत्रास्ते ?

(सुरेन्द्रनाथमुद्दिश्य) सुरेन्द्रनाथ ! भृशं वाञ्छामि मातृकास्तुतिं श्रोतुम् । कश्चन तरुणगायकवरस्तत्र गृहमकाशे निवसते वा ? तस्मै चेतो ममोत्कण्ठते ।

सुरेन्द्रनाथ । देव । विद्यते मद्गृहसकाशे नरेन्द्रनामधेय कश्चन दत्तवंशोद्भवो युवक साम्प्रत विद्यार्जनरत । ब्राह्ममन्दिरादिकञ्च गच्छति । तरुणे वयसि वर्तमानोऽपि असौ सत्यमेव सङ्गीतनिपुण ।

श्रीरामकृष्ण । (नरेन्द्रनाम श्रुत्वा हर्षान्वित) किं नाम ? नरेन्द्र इति । सत्य सर्वनरश्रेष्ठ एवासाविति कथ मह्य प्रतिभाति । अथवाऽकारण वा स्निह्यत्यस्मिन् मम मन । अनो अपूर्व वस्तु खलु मन। यदनागतकारण सूचयति तदुपलक्ष्य प्रसीदति, स्थलपद्महास हसति चानागतवार्णोदयकामनया। अथवा मन सत्य वा स्पर्शमणिरदृष्टशक्त्याऽकर्षति कठिनमपि लोहखण्डम् ।

(जननीभवतारिणीमुद्दिश्य बद्धाञ्जलि)

जननि । अप्येष नरेन्द्रो वरणीयतमो मम मानसपुत्र स्यात् । मात कृपामयि । कदापि त्व मृषा न निर्दिशसि । सत्वर ब्रूहि, मात । एष नरेन्द्र एव मम श्रेष्ठ उत्तरसाधक स्यात् ?

(सुरेन्द्रमुद्दिश्य) सुरेन्द्रनाथ । सुरेन्द्र । नरेन्द्रनामधारिणे तरुणाय संदेश प्रेषय । तद्दर्शनायाहमाकुला वर्ते ।

सुरेन्द्रनाथ । (विस्मयमापन्न) नैष नरेन्द्रो गुरुदेवपरिज्ञात । किन्तु कथ गुरुदेवो मम तस्मै भृशमुत्कण्ठते ? अथवा गम्भीरा खलु महतां चित्तगति ।

तलस्थ तलमारभ्यातं सप्ततला वसुन्धरा ।
सर्वत्र दृश्यते शेषो महात्मचरित विना ॥ १५
हृदये मौक्तिकी माला दन्तेषु कौमुदीच्छटा ।
सरोजकोटिलावण्य पादद्वन्द्वे विराजते ॥ १६
गुरुवर्यस्य माहात्म्यं महितममितं ध्रुव ।
भूमण्डले वर्णयेत् कोऽनन्तानन्तमुखैर्विना ॥ १७

तद्यथा तथा वा भवतु । गुरोरादेशोऽचिरात् परिपालनीय ।

(परमहंसमुद्दिश्य) देव । अहं यामि । भवता क्षन्तव्यताम् । अचिरेण प्रत्यावर्तिष्येऽहम् ।

रामकृष्ण । अहो ! तरुण एव शिक्षणीय , कोमलहृदयत्वात् सर्वमेव तस्य हृदि भवत्यङ्कितम् , अथवा प्राक्तनमेव पर कारणम् । यद्वा वाञ्छाम्यहं द्रष्टु जटाजूटधारिणं सर्वभारवाहिनं सुरधुनीकलकलधारामालिनं शिवं विश्वस्य शङ्कर ममान्तरमाधरम् ।

अहो सुरेन्द्र पुनरावर्तते तेन सह ।

यद्वा ससाराश्रमस्थ एष सुरेन्द्रो मम परमस्नेहभाजनम् । सत्य किल— गृहस्थधर्मोऽपि अखिलपुरुषार्थसाधन इति । ससाराश्रमा गर्हा नार्हति कदाचन ।

(सुरेन्द्रनाथो नरेन्द्रेण सह प्रत्यावृत्त) ।

नरेन्द्रनाथ । (प्रविश्य) साधवे नम ।

(श्रीरामकृष्णास्त निपुण पश्यति । नरेन्द्रश्च किञ्चित् पर्याकुला दृश्यते) ।

श्रीरामकृष्ण । (स्वगत) । अहा एष एव स बालक यदर्थमह नक्तन्दिन प्रार्थये । कोमल कुञ्चित कशागमसुसज्जशिरस्काकर्णविस्फारित- नयनाऽय दर्शनदानेनैव मामतुलन नन्दयति । हृदयतटिनी मम सगर्जन धावतितरा सागरसङ्गमे सागरजलस्फीतिप्रभावात् यथा गङ्गाजलधारा । नटनूतनचटुलमिव भासते मम चित्तस्थल यत्र मम स्मृतिगुल्मदल चटुल कम्पते मलयपवनस्पर्शात् पुलकाकुल वेणुवन यथा ।

नरेन्द्रनाथ । अहो ! कथमह नात्मान प्रशमयितु समर्थोऽस्मि । नाह स्वीकरामि स्वीकरिष्यामि वा तथापि हृदय मे सस्मारयतीव एष एव हृदयानन्दनश्चन्द्रो यस्यानन्दरश्मीश्चकार इवाह पिबामि । अयमेष एव महामन्दारद्रुमो यस्याङ्काश्रयि चेतो मम कोटिपुष्पे जगत् करिष्यति सफुल्लतमम् ? अयमेष नन्दनस्थ पारिजातद्रुमो यस्य महापल्लवरसनिषेकेण हृदयमरुस्थली मम भविष्यति लतागुल्म विटपदलसुशोभितम् । किंवा एष प्रत्यागतकल्पद्रुमस्त्रिभुवनस्य सन्तापाभावविनाशाय ? कोऽसौ महानुभाव कोटिसूर्यसमप्रभ अथच कोटिचन्द्रसुशीतलो राजते धरातले ?

अथवा क्षणिक, क्षणिक एष मे चित्तविकार ?

मानवशरीरे भागवतत्तारोप नाह कदापि स्वीकरिष्यामि।

धिङ् मम विद्या यदित्थमप्रलापमिवाह कृतवान्। धिङ् माम् !

श्रीरामकृष्ण। (स्वगतम्) अहो शान्त चित्तम्। जननि भवतारिणि ! त्व कदापि न मामपरितृप्त जीवनपथे चालयसि।

मन्ये निवारिता मम दीर्घपिपासा श्रेष्ठभक्तसन्तानवदनकमलनिरीक्षणेन। एष एव मम सवशुभङ्कर सदाशिव आकर्णविस्तृतनयनेन्दीवर भुजयुग निन्दितकरिकरयुगवरो व्यूढोरस्क सदाशिव अत्रैव सुरेन्द्रेण सह समायात। आनन्दविह्वल किमह करोमि।

(आनन्देन नृत्यति)

श्रीनरेन्द्र। (स्वगतम्) कथमुन्मत्त इव नरीनृत्यमान एष जनो मम हृदय पर्याकुलयति। अथवैष मम चित्तस्य भ्रम।

श्रूयत महता चित्त जगत्कल्याणतत्परम्।
दैन्य द्रवयतऽन्यस्मात् सिक्ताद् वारीव वासस ॥ १८

श्रान्तिक्लान्तिभ्रान्तिसन्दोहनाशी
लोके कश्चित् पादप क्वापि मृग्य।
यस्मिन् बद्धा शान्तिनीडान् विहङ्गा
लीना साय शेरत दैन्यहीना ॥ १९

ताप पाप दुखदैन्ये च हन्तु
मर्त्य शक्तो जायते नेह देव।
मर्त्येऽशक्ते दत्तखेदापहारे
शक्तस्त्वक सज्जनो मानवानाम् ॥ २०

नूनमेव महात्मा मम हृदय समाहरणशलाकयेव घट्टयति।

सुरेन्द्र। भगवन् ! श्यामाह इव मम समुपजातो यदद्यैन नरेन्द्र पितृपरिचयादिक्रमेण भवत्कायो नोपस्थापितवान्।

रामकृष्णः । सुरेन्द्र ! एष मम जन्मजन्मान्तरपरिचितो जनः, कथं तद्दर्शनपरिचयापेक्षी भवेयम् ? अथवा नाहं त्वां नरेन्द्रस्योद्वेगकारणम् । केवल गानापानुरागेण्मि।

(नरेन्द्रमुद्दिश्य) नरेन्द्र ! त्वन्मुखान्मातृनाम भूयः श्रोतुकामोऽस्मि । सङ्गीतेन मम कुरु चित्तविनोदनम् ।

नरेन्द्रः । जननी मयि प्रसीदतु ।

(गायति)

मनो निभृतं पश्य श्यामाजननीम् ।
श्मशानवासिनीं नृमुण्डमालिनीं
हिमाचल-नन्दिनीं विश्वपालिनीम् ॥ २१
मुहु. सौदामिनी-विलासिनीं
नित्य-स्मितोत्ताट्टहासिनीं
पुण्य कोटि-प्रसादनीं शिवाकोटिहादिनीं
पादारविन्दशिवा शिवदायिनीम् ॥ २२
मनो मेऽद्भनिशं पश्य
जगद्धात्रीं भवबन्धहारिणीं
शक्तिस्वरूपिणीं जननीम् ॥ २३

श्रीरामकृष्णः । नरेन्द्र ! अपूर्वं तव कण्ठस्वरः । अपरिमितश्च तव भक्तिमाहात्म्यम् ।

(स्वगतम्) जननि कथमीदृशो विनयः कृतस्त्वयाऽस्य समर्पणे ? अथवा तवेच्छा एव मयानुवर्तव्या ।

(गायति)

इच्छाजातं तव सर्वम्
इच्छामयी ताराऽसि त्वम् ।
तव कर्म करोषि त्वमम्ब !
लोको वदति करोम्यहम् ॥ २४

करिण बध्नासि पङ्के
　　पङ्गुं लङ्घयसि गिरिम् ।
कस्मैचन ब्रह्मपदार्पण
　　करोष्यन्यमधोगामिनम् ॥ ७५
यन्त्रमह यन्त्रिणी त्व
　　गृहमह गृहिणी त्वम् ।
रथोऽह रथिनी त्व
　　चलामि यथा चालयसि माम् ॥ ७.

(श्रीरामकृष्ण अभिभूत इव प्रायेण समाधिस्थ)

विवेकानन्द । अहो कण्ठस्य कोमलता । अहो गानाक्षराणा रमणीयता । अहो तालादीनां सुसमञ्जसता । अथवा—

न वाक्षाराणा न च वा स्वराणा
न चापि तालस्य न वा लयस्य,
　　श्रोतुर्मनो यद् गलतीह गानात्
　　सोऽय प्रभावोऽखिल एव गातु ॥ ७७

रामकृष्ण । सत्य देवि भवतारिणि ! जगदम्बिके । भव त्व भृश कृपापरायणा यथैष एव वरेण्यसन्तानो देशस्य सर्वकालिमान दूरीकर्तु शक्नुयात् ।

(तत प्रविशन् भक्तगायक गायति)

(अहो) मेलनक्षणो मङ्गल ।
मोहनभास्करकर-फुल्लचित्तशतदल—
　　पूर्णमहिमभोज्वल ॥ ७८
नैसर्गिकनिर्झर-वारिधारोद्गार—
　　पुण्यप्रवाह-विमल ।
वैद्युतप्राकार - दीपशोभासार—
　　मूर्तानन्दोऽविकल ॥ ७६

श्रीनन्दनकानन-पञ्चद्रुमशोभन-
समन्वय-शुभ-परिमलः ।
सागरोर्मिकोटि-नृत्यतालपरिपाटी—
हिन्दोलातिविह्वलः ॥ ३०
विल्मन्कोकिलदल-कूजनसकलकलः
भूतलनहिम-कल्लोलः
(अहो) मंगलक्षणो मङ्गलः ॥ ३१

समाप्त प्रथम दृश्यम् ।

—०—

द्वितीय-दृश्यम् ।

[स्थानम्—दक्षिणेश्वर मन्दिरम्

समय —पूर्वाह्ण ।

दक्षिणेश्वर मन्दिरे शकटादवतरन्ति सुरेन्द्रनाथमित्रो वयस्यद्वय तथा च नरेन्द्रनाथ]

सुरेन्द्रनाथ । अहो आनन्द । समग्रदिग्दिगन्त स्वप्रभविभया प्रोज्ज्वलयन् तथाऽशान्तजगति शान्तिधाराञ्च प्रवाहयन्निव राजतेऽग्रे परमकल्याणमयो भगवान् श्रीपरमहंसदेव ।

आविर्भूतोऽस्ति देव कलिकलुषहतानुद्दिधीर्षुर्भवाब्धे—
रैशी सत्ताञ्च विश्वासयितुमथ जनान् घोर-नास्तिक्य-नष्टान्।
एतस्मिन् जायमाने जगति कलिबल सर्वथा संहृत भो
भावो वृन्दावनीयो भरतभुवि पुनर्भासते हर्षकारी ॥ ३२

नरेन्द्रनाथ । अहो ! विश्व काटि कोटि कल्याणविमण्डित मधुहास्य सदोज्ज्वलम् अस्य महात्मनो वदनम् । यदि अस्मान्महाजनाज् ज्ञातु शक्नुया भगवान् सत्य राजते न वा— तदा भवेन्मम चित्तशान्ति ।

(सर्वानुद्दिश्य) बहु प्राच्य पाश्चात्य दर्शनग्रन्था मयाऽक्रान्त पठिता । किन्तु हृदये शान्ति काचन कथञ्चन वा न लभ्यते ।

सुरेन्द्रनाथ । तदय स्थानमेतदेव ।

एतदीश्वरविश्वासि पद शान्तेरनाकुलम् ।
आश्वासस्थानमेतच्च निराशाना स्वजीवने ॥ ३३

वयस्यानामन्यतम । तद् भगवास्तव सहायो भवतु, सत्यमेव त्व समधिक विचलितोऽसि ।

परप्रेम्णा कथं जातमत्रैतनं
विस्मरस्यात्मजनम् ?　　॥ ३८
सत्यपथे कुरु मन आरोहण
प्रेमालोकोज्ज्वलध्वजानुसरणम् ।
तव तु सयत्नं भवतु पुण्यधनम्
अतियत्नसंगोपनम्　　॥ ३९
लोभ-मोहादिकः पथि दस्युगणः
करोति पथिक-सर्वस्वहरणम्　　।
परमयतन कुरु प्रहरिणौ
शमदमौ मापयानम्　　॥ ४०
साधुसङ्ग-नाम्नाऽन्ते पान्थधाम
श्रान्तस्य तव तत्र भवतु विश्रामः ।
पथिश्रमे सति पथिज्ञिज्ञासन
कुरु　　पान्थालयजनम् ॥ ४१
यदि पथि कोऽपि भयसमुदयः,
प्राणपण राजशपथो देयः ।
पथि राजा यतः प्रबल-प्रतापः
शमनोऽनुनाति यस्य शासनम् ॥ ४२

(श्रीरामकृष्णः समाधिं नाटयति, ततो गतचैतन्यश्च भवति)

श्रीरामकृष्णः । (केशवचन्द्रमुद्दिश्य) वत्स केशव ! अतुलनीयः खलु नरेन्द्रः । तुलनामुखेन वक्तुं शक्यते— अन्येषां कस्यचन दशदलानि, कस्यचन वा षोडशदलानि ; किन्तु पद्मेषु नरेन्द्रो मम सहस्रदलानि । पुष्करिणीषु नरेन्द्रः प्रकाण्डतमो यथा हालदार-पुष्करिणी । मत्स्येषु नरेन्द्रो रक्तचक्षु-रोहितः । अन्ये सर्वे क्षुद्र-शफरमत्स्याः ।

केशवः । सत्यं विस्मितोऽस्मि । एष बालको मम सुपरिचित एव । तस्य

इयमेव रीति केशवसेनमहोदयस्य ।

केशवचन्द्रसेन । भक्तिनदीनिमग्नस्य जनस्यैव एषा रीति ।

रामकृष्ण । भक्तिनदीनिमग्नस्य ? कथम् ?

केशवचन्द्रसेन । सच्चिदानन्दसागरनिमज्जनार्थम् ।

रामकृष्ण । (ईषद् हसन्) केशव ! —

पृष्ठे निबध्येष्टकमात्मनो यथा
स्थातु न शक्नोति चिर समुत्प्लवन् ।
एव सुतादीष्टकभारभङ्गुर
किं सतरीत क्षमते सुखाम्बुधौ ? ॥ ३८

केशवचन्द्रसेन । किन्तु गृहस्थस्य भगवल्लाभ किमसम्भव ?

रामकृष्ण । केशव ! पश्य । मायापरिवृता जनो नारिकेल–सदृश । अपक्वावस्थाया पक्वावस्थायां चान्त स्थिताया श्वेताष्टे पृथगवस्थानम् । पक्वनारिकेलस्यापि शब्दायते, अपक्वस्य न ॥

पुन श्रृणु, अहभाव सर्वापदा कारणम् । गृहस्योपरि जातमश्वत्थ वृक्षमुत्पाट्य, परस्मिन् दिवस पुनस्तस्याकुरोद्गम द्रक्ष्यसि । पलाण्डु गन्धयुक्त भाण्ड वारमनेक प्रक्षालय, गन्धस्तु यथापूर्व राजते । अह–भावोऽपि तादृश ।

(सुरेन्द्रनाथमुद्दिश्य) सुरेन्द्रनाथ । तव गृहे त्वया सहागतस्य नरेन्द्रनाथस्य तद्दिने सङ्गीतमाकर्ण्य लब्धा परा शान्ति, परमश्चानन्द ।

नरेन्द्रनाथ । पुनरपि सङ्गीतपुलकित कुरु हृदय सर्वेषामस्माकम् ।

नरेन्द्रनाथ । नास्ति मम सङ्गीतविषये काचन विप्रतिपत्ति । तथा करोमि । (गायति)

मनश्चल स्वीयनिकेतनम् ।
ससारविदेशे वैदेशिकवेशे भ्रमसि कथमकारणम् ? ३७
विषयपञ्चक तथा भूतगण
सर्वेऽनात्मीया कोऽपि न निजजन ।

परप्रेम्णा कथ जातमचेतन
विस्मरस्यात्मजनम् ? ॥ ३८

सत्यपथे कुरु मन आरोहण
प्रेमालोकोज्ज्वलश्चलानुक्षणम् ।
तव तु सवल भवतु पुण्यधनम्
अतियतनसगोपनम् ॥ ३६

लोभ-मोहादिकः पथि दस्युगणः
करोति पथिक-सर्वस्वहरणम् ।
परमयतन कुरु प्रहरिणौ
शमदमौ सावधानम् ॥ ४०

साधुसङ्ग-नाम्नाऽस्ते पान्थधाम
श्रान्तस्य तव तत्र भवतु विश्रामः ।
पथिश्रमे सति पथिजिज्ञासन
कुरु पान्थालयजनम् ॥ ४१

यदि पथि कोऽपि भयसमुदयः,
प्राणपण राजशपथो देयः ।
पथि राजा यतः प्रबल-प्रतापः
शमनोऽनुयाति यस्य शासनम ॥ ४२

(श्रीरामकृष्ण. समाधि नाटयति, क्रमेणात्मस्थश्च भवति)

श्रीरामकृष्ण. । (केशवचन्द्रमुद्दिश्य) सत्य केशव ! अतुलनीय' खलु नरेन्द्र. । तुलनामुखेन वक्तु शक्यते— अन्येषा कस्यचन दशदलानि, कस्यचन वा षोडशदलानि , किन्तु पद्मेषु नरेन्द्रो मम सहस्रदलानि । पुष्करिणीषु नरेन्द्रः प्रकाण्डतमो यथा हालदार-पुष्करिणी । मत्स्येषु नरेन्द्रो रक्तचक्षू रोहित. । अन्ये सर्वे क्षुद्र-शफरसदृशा. ।

केशव. । तदद्य विश्नमिम । एष बालको मम सुपरिचित एव । तस्य

पिता विश्वनाथदत्तमहोदय. परम धार्मिको महाजनः । समगुणयुक्तश्च तस्य प्रथमः सन्तानो भवदाशीर्वादैः पृथिवी जेष्यतीति ममाशा ।

तदत्र वय गच्छामः ।

रामकृष्णः । तद् भवतु पुनरागमनाय पुनर्दर्शनाय च ।

केशव. । प्रणाम' ।

रामकृष्णः । प्रणामः, पुन. प्रणाम. ।

(केशवादयो वहिर्गच्छन्ति । केशवविजयादीना प्रस्थानानन्तरम्)

रामकृष्णः । अहो नरेन्द्र ! सर्वेषु नरेषु त्व गरिष्ठोऽसि ।

नरेन्द्रनाथः । अत एव जना भवन्तमुन्मत्त कथयन्ति ।

श्रीरामकृष्णः । यदि ते तथा वदन्ति, तद् भवतु नाम । किन्तु नरेन्द्र ! किमह करिष्यामि ? माता यथा निर्दिशति, तथैवाह वदामि ; यथा दर्शयति, तथा पश्यामि । मातृनिर्देशक्रमेण सर्व करोमि च ।

नरेन्द्र. । (श्रीरामकृष्ण प्रति) अपि मातृनिर्धारणमेतत् ? अथवा भवत एव चित्ताभिलापप्रकर्षः ? कथ मया विज्ञेय ? भवता व्यापारस्तु मस्ति-ष्कशेपोक्त इव प्रतिभाति ।

रामकृष्ण. । विश्वसिहि नरेन्द्र । नाह किमपि करोमि । माता सर्व कारयति ।

नरेन्द्रः । मातुर्नाम-श्रवणमात्र नाह सर्व विश्वसेयम् । पाश्चात्य-दर्शनेभ्यो ज्ञायते यद् चक्षु कर्णादिकेन्द्रियाणि अस्मान् सर्वान् प्रतारयन्तीति । पुनर्यदि विषयविशेषस्य वासना हृदि सदा जागर्ति तदैतत् सत्यमभ्रान्त लक्ष्यते । यतो भवान् मामाद्रियते, मयि चित्त भवतः सर्वदा स्निह्यति, तदर्थमेव भवता साक मम दर्शन सञ्जातम् ।

भवन्त दृष्ट्वाह सस्मरामि किलोपाख्यानमेकम् । पुराणेषु लिपिबद्धमास्ते भरतराजो भृश हरिणध्यानपरायणो मृत्योरनन्तर हरिणदशा प्राप । यथा भवान् मदर्थ चिन्तयति तथा भवतो दशा तादृश्येवावश्यमेव भविष्यति ।

श्रीरामकृष्णः । सत्यं नु कथितं त्वया । किन्तु रे बालक ! का नाम दशा मम भविता ? त्वामदृष्ट्वा नाहं जीवितुमाप्नोमि नु क्षणमेव ।

(स्वगतम्) अहो नरेन्द्रो न कदापि मृषा भाषते । तत् किं भूयोऽपि विश्वमातरं पृच्छामि ? (नरेन्द्रमुद्दिश्य) न मम माता कदापि मां विपथे चालयति । त्वमत्र तिष्ठ । सत्वरं प्रत्यावर्त्तिष्ये ।

(श्रीरामकृष्णो बहिर्गतः । नरेन्द्रः एकतन्त्रीसाहाय्येन गायति ।)

सङ्गीतम्

जानीहि मनो कोऽपि न स्वजनो
मृषा भ्रमसि भूमण्डले ।
विस्मर न भवतारिणीं बद्ध भूत्वा मायाजाले ॥ ४३
यस्याः कृते चिन्तन ते
नासौ सङ्गिनी मरणकाले
परिस्करणपरा प्रेयसी प्राणहरा
दूरस्थाऽमङ्गले ॥ ४४
दिनत्रय-चतुष्टय प्रभवसि धरामण्डले ।
निक्षिप्स्यसे दूरे भयात् ममायाने कान्ते काले ॥ ४५

श्रीरामकृष्णः । (त्वरित प्रविश्य) भो नरेन्द्र ! शृणु । त्वं यथा भाषसे, न तथा । माता मम मत्र वदति—

सत्य नारायणस्त्वं शिव इति सुतरामाद्रिये त्वामहञ्च
स्नेहस्त्वय्येष मे य. स च तव शिवताहेतुकः सत्यमेव ।
मात्रा चाहं भवान्या कथित इदमये वत्स जानीहि सत्यं
हीनो नारायणेन त्वमसि यदि सुत तर्हि ते नेक्षिताहे ॥ ४६

अतस्तवार्त्ति नाहमाद्रिये । प्राणप्रिय नरेन्द्र ! पुनस्तव सङ्गीतमेकं श्रोतुं वाञ्छामि ।

श्रीनरेन्द्रः । बाढम् । (गायति)

जननि मम त्वं हि तारा
त्रिगुणधरासि च परात्परा ।

जानामि त्वां मातर्दीनदयामयि
दुर्गमेऽसि त्वं दुःखहरा ॥ ४७
त्वमसि जले तथैव स्थले
नभसि पाताले तथा च भूतले ।
घटे पटे पुनर्हट्टे चैव घाटे
सर्वाकारधरा निराकारा ॥ ४८
त्वमम्ब सन्ध्या त्वं हि गायत्री
हर्त्री कर्त्री सर्वनियन्त्री ।
अकूलनिमज्जित-पदधन-दात्री
सदाशिवसदासुखदानपरा ॥ ४९

श्रीरामकृष्णः । (आनन्देन नृत्यति) भो नरेन्द्र ! नरेन्द्रनाथ ! तव सङ्गीतं श्रुत्वा सम्यग् बुध्ये सत्यमेव त्वं धरित्र्या विमोक्षाय धरित्रीं समागतः स्वयं शिव इति ।

नरेन्द्रनाथः । नात्र मम कृतित्वं किमपि, एतत्तु सङ्गीतस्य महामाहात्म्यम् इति ।

(श्रीरामकृष्णो नरेन्द्रनाथस्य शिरसि करं निधाय क्रमेण पृष्ठे चापि दक्षिणकरं विलेपयन् करोति प्रभूतमश्रुवर्षणम्)

श्रीरामकृष्णः । शिव ! शिव ! कथमेतावतः कालादनन्तरं समागतोऽसि ? यदहं तव पन्थानमवलोक्य दीनदीनं कालं यापयामि, अपि तन्न सकृदपि स्मर्तव्यम् ? विषयिजनैः सह वार्तालापं कुर्वाणस्य ओष्ठयुगलं दग्धमिव जातम् । अहो ! निष्करुणो बालको मे शिवात्मकः । सत्यमकरुणस्त्वमसि (इति पुनरपि रोदिति) ।

नरेन्द्रनाथः । (स्वगतम्) अहो ! सङ्गीतस्यैव महाप्रभावो यन्नागतस्याप्येतस्य महात्मनो हृदयमाकुलीकरोति ।

अथवा स्वभावतः प्रायोन्मत्त एष योऽकारणं भावावेगाद् रोदिति । तन्मया एवमस्मै उत्तरं देयम् । अथवा सर्वथेषु विषयेषु मौनमेव वरम् ।

श्रीरामकृष्णः । निष्करुणाय बालक-शिवाय ददेऽह नवनीतं मिष्टान्नञ्च । एतद्भक्षणेन सन्तोषं मम विधेहि ।

विवेकानन्दः । (बहिःस्थान सर्वान् आहूय) युष्माभिरपि भोजनायागन्तव्यम् । नैतत् सर्वं भक्षणाय अहमस्म्यलम् ।

रामकृष्णः । नहि, नहि, एतत् सर्वमनेनैव भक्षणीयम् । खाद्यान्तर युष्मभ्यं ददामि ।

(इति नरेन्द्रं तत् सर्वं भक्षयितुं प्रोत्साहयति, नरेन्द्रश्च भोक्तुं प्रवर्तते)

(नरेन्द्रस्य करौ धृत्वा) नरेन्द्रनाथ ! त्वामहं याचे मत्कर्मैकलक्ष्ये स्थानेऽस्मिन् समागमिष्यसि ।

नरेन्द्रनाथः । (क्षणं समौनः स्थित्वा) भवतु, तत् करिष्यामि ।

श्रीरामकृष्णः । सर्वं मङ्गल भगवत्कृपाप्रसूतम् ।

गच्छ वत्स पितृस्थान सुखं सङ्गच्छ बान्धवान् ।
अचिरेण पुनर्यावि दर्शनं ते सुखाय नः ॥ ५०

समाप्तं द्वितीय-दृश्यम् ॥

—०—

तृतीय - दृश्यम् ।

[स्थानम्—दक्षिणेश्वरे भवतारिणी-मन्दिरे
श्रीरामकृष्णस्य गृहम् ।
समय—प्रातःकालः ।
श्रीरामकृष्णो नरेन्द्रनाथश्च]

(स्वकक्षे उपदेशरतः श्रीरामकृष्णः। नरेन्द्रनाथो विद्युद्वेगेन प्रविशति।)

श्रीरामकृष्णः। एवं सर्वे यूय जानीथ, मम जननी भवतारिणी कदापि शिवः, पुनः कदाचन कृष्णः, एकाधारे सैव सर्वम्। सर्वेष्वेव सा राजतेऽवितथमनिकलम्।

नरेन्द्रनाथः॥ (कराघातपूर्वक कवाटमुद्घाट्य तस्य कक्ष प्रविश्य) तद्यथा तथा वा भवतु, अपि भवान् श्रीभगवन्त दृष्टवान्?

महर्षि देवेन्द्रनाथमहं पृष्टवान् अपि भवान् भगवन्त दृष्टवान्? नाहं तत्र किञ्चन सदुत्तर लब्धवान्। केवल स मामुक्तवान्—"नरेन्द्र! तव चक्षुषी दृष्ट्वा बुध्ये त्व योगी भविष्यसीति"। किन्तु तेन मम किम्? अहं भवतस्तस्मात् ज्ञातुमिच्छामि—

भगवन्तं भवान् कच्चित् कृतवानक्षिगोचरम्?
हित्वाऽस्पष्टवचो ब्रूहि विस्पष्टाक्षरमुत्तरम्॥ ४१

(स्वगतम्) अहो! मम किं नु भवेद्यदि एषोऽपि मां निराशमाम कुर्यात्।

रामकृष्णः। नरेन्द्र! मा चिन्तापरायणो भव। ईश्वरमहं प्रत्यक्षं

दृष्टवान् । यथा त्वां प्रत्यक्षं पश्यामि, ततोऽपि स्पष्टतरम् अहं श्रीभगवन्तं दृष्टवान् ।

नरेन्द्रः । (स्वगतम्) अये मनोमोहनं वचो महाशयस्यास्य यस्याकातरस्नेहो मां करोति निष्पत्तसत्त्वम् ।

प्रोद्यद्भास्करप्रभोऽर्धनिमीलितचक्षु मधुरान्मधुमत्तमं भाषमाणः को न्वेष देवो राजते भूतले ?

अस्य वचः श्रुत्वा सत्यं नु विश्वास उपजायते नैतादृशो महात्मा मिथ्या भाषणसमर्थो भवति । तेन च को न्वन्य लाभो वा स्यात् ?

रामकृष्णः । (भावाविष्टः)

सत्यं वच्मि नरेन्द्राय प्रत्यक्षमीश्वरो मया ।
सर्वदा दृश्यते पूर्णं ततोऽपि स्पष्टो हि मः ॥ ५२

श्रीनरेन्द्रः । (स्वगतम्) किन्त्वाश्चर्यस्य विषय एष यदीदृशमपि महात्मानं केचन विकृतमस्तिष्कं प्रोद्घोषयन्ति । स्वार्थविज-दौर्बल्यमानमेतत् किं नु भवितुमर्हति ?

श्रीरामकृष्णः । किन्तु नरेन्द्र ! ईश्वरप्रापणाय ईश्वरस्याकुण्ठ-सेवाऽवश्यमेव करणीया । पन्थाः स न कुसुमावृतः । तस्य भगवतः प्रापणाय मायापाशोऽवश्यमेव छेदनीयः ।

श्रीनरेन्द्रः । (उन्मत्त इवेतस्ततः परिभ्रमन्)

भविष्यति दिनं मे किं नितरां विफलम् ?
दत्तं मयाहर्निशं त्वय्येवाक्षियुगलम् ॥ ५३
त्वं त्रिभुवननाथः
अहं भिक्षुकोऽनाथः
कथं वदिष्यामि त्वाम् एहि रे मम हृदये ॥ ५४
हृदय-कुटीर-द्वार
निरर्गलमनिवार
सकृपमागत्य सकृद् हृदय कुरु शीतलम् ॥ ५५

श्रीरामकृष्ण. । नरेन्द्र ! तव हृदये ब्रह्म नियत वसति । सेवा-दया-दाक्षिण्यपरायणः शिवस्त्व भविष्यसि निखिलविश्वस्याश्रयस्थलम् ।

आत्मविषये कथ त्व चिन्तापरायणोऽसि ?

भगवति भवतारिणि ! एन मम सन्तान कुरु त्वदाशीर्वादधन्यम् ।

निरन्तर सागरगर्जनेन सहैष धर्मवाद देशप्रेमप्रचोदित प्रोचारयतु । चन्दन-सौरभेण सह भारतीय धर्मदर्शन गौरभमेव एष दिशि दिशि विकिरतु । सञ्जीवनौषधिर्भूत्वा मृतकल्प जगदेष मम वरसन्तान' पुनः करोतु सजीवितम् । स्वस्वरूपमज्ञात्वैव एष शिव. जगतः शुभङ्करः अन्तर्गूदरमास्वादन रतोऽन्ते आस्वादयतु त्वत्कृपारसम् ।

नरेन्द्रः । (श्रीगुरो पादपद्म ममाश्रित्य)

त्वादृग्गुरुर्विपुलपुण्यफलेन लभ्यः
सम्पन्नममातिमहती तव पादसेवा ।
याचूष्वा पदाब्जयुगले तदिय त्वदीये
यद्वाञ्छित तव विधातुमह प्रभु. स्याम् ॥ ५६

समाप्त तृतीय-दृश्यम् ॥

—०—

चतुर्थ - दृश्यम् ।

[स्थानम्— श्रीरामकृष्णस्य प्रकोष्ठः ।
समय.—रात्रिः ।
श्रीश्रीपरमहंसदेव—नरेन्द्रनाथ - कथोपकथनम्]

(श्रीरामकृष्णो गायति)

मम माता त्वं हि तारा त्वं त्रिगुणधरा परात्परा ।
जानामि माता रे दीनदयामयि, दुर्गमे त्वमसि दुःखहरा ॥ ५७
सर्वत्रासि जले स्थले
त्वमाद्यमूले रे मात. ।
असि सर्वघटेऽस्थिपुटे—
साकाराऽथवा निराकारा ॥. ५८
त्वं हि सन्ध्या त्वं गायत्री, त्वं जगद्धात्री रे मातः ।
अकूले च त्राणकर्त्री, सदाशिव - मनोहरा ॥ ५६

श्रीनरेन्द्रः । (स्वगतम्) महाकालाहलमयोऽप्येषोऽय भावसमुद्रः । तिमिंगिलगिलानां यथाऽयमाश्रयस्तथा रत्नानामपि । ततो नाहं सागराद् बिभेमि । शौर्यं वीर्यं सर्वदाऽऽध्येयम् । तद्विपर्ययेऽहं भ्रती च ।

(श्रीरामकृष्णमुद्दिश्य)

किन्तु कथं मां भवान्तयाऽकर्षति, यदहं स्वकृत्यानि परित्यज्य सर्वदाऽत्रागन्तुम् उत्कण्ठितो भवयम् । यस्य स्वाहं उपवासशीर्णां रोदिति जननी तथा च भ्रातरः, कथं वा तस्य स्वमुक्ति-विलासः ?

दैन्यसागरमग्नस्य सचिन्तस्य निरन्तरम् ।
तत्राश्रुभिः कुटुम्बाना निर्वाणं मे कथं भवेत् ॥ ६०

श्रीरामकृष्णः । चेतोभरण नरेन्द्र ! बाहुबल न सर्वातिशायि । माता नेच्छति चेन्मानवबाहुर्नोत्तोलितो भवति कदापि । जनन्या अभिलाषं विना नाग्निर्दहति, पवनो न वाति, सूर्याचन्द्रमसौ न भातः । सर्वमेतत् जगज्जनन्या इच्छाक्रमेण भवति । तत् सत्य त्व वाञ्छसि चेत् स्वपरिवार-भरणपोषणे, मातृसकाशे तन्निवेदय । कृपामयी साऽवश्यमेव त्वयि कृपां विधास्यति, तव परिवारजनोऽन्नकष्टमुक्तो नितरां भविष्यति ।

नरेन्द्रनाथः । ममाधिकार. श्रीगुरुसकाशे निवेदने । तस्मात् प्रार्थये भवानेव मदर्थ निवेदन कुर्यादिति । (श्रीगुरोः पादपद्मे समाश्रित्य)

त्वादृग् गुरुर्विपुलपुण्यफलेन लभ्यः
सम्पन्ममातिमहती तव पादसेवा ।
याचे्ऽद्या पदाब्जयुगले तदिय त्वदीये
यद् वाञ्छित मम विधातुमहो व्रती स्याः ॥ ६१

देव !

दारिद्र्यादि-समुद्भवेन भगवस्तापेन सतापितो
वाञ्छस्तत्प्रतिकार-पद्धतिमिहायातोऽस्मि ते सन्निधौ ।
तस्मात्त्वा शरण गतस्य नितरा खिन्नस्य ससारतो
वेद्य वेदय मार्गमर्गलविनिर्मुक्त हि मुक्तेर्मम ॥ ६२

श्रीरामकृष्णः । नरेन्द्र ! भूयोऽपि कथयामि—जननी मम जगन्नियन्त्रणकर्त्री । तस्याः सकाशे प्रार्थनायां कथं तव वैमत्यम् ?

सा चेत् प्रसीदति मनाङ् न जनो विषीदेद्
दीनोऽथ दीर्णहृदयः परितापनो वा ।
आजीवन कठिनया कलितो रुजा वा
तस्य त्रितापहरणीं शरण कुरुष्व ॥ ६३

(ततो बहिर्गच्छति नरेन्द्रः)

श्रीरामकृष्ण. । जननि भवतारिणि ! शिवतुल्योऽय जगतो चिरशिशो बालक आचरतु ममाभिलषितम् । एष एव मम चिरेप्सो जनो यो मम धर्म दर्शनञ्च जगति सञ्चारयिष्यति ।

विष्णोर्यथा गरुड़ एषोऽपि मम वाहनो भूत्वा सद्धर्मविज्ञावितं करोतु जगत् । मम सर्वा शक्तिरस्मै एव प्रदेया ।

(विचिन्त्य) अहो बुध्ये नैष वटुरस्मिन् कर्मणि जातः समर्थः ।

(पुनः प्रविशति नरेन्द्रनाथः)

नरेन्द्रः । देव ! देवीसकाशे कथमप्यहं तद्विषयकं किञ्चिद् वक्तुं न शक्तोऽस्मि । तस्या दर्शनमात्रेण मम चित्तं विषयान्तरनिविष्टं भवति । बहिर्भूत किञ्चिदपि नाहं स्मरामि । तत्र भवन्त एव प्रमाणम् ॥ जनन्यै केवलमहमुक्तवान्— "जननि ! विवेक वैराग्यं ज्ञानं भक्तिं च मह्यं देहि । यथा त्वत्कृपया त्वां द्रष्टुं समर्थो भवेयम्"।

देवदेव ! वारत्रयं भवदादेशेनाहं गतवान् । जनन्या भुवनमोहन-रूपेण श्रीमन्दिरं समुद्भासितं ; वराभयकरौ विस्तार्य सुमनोहरं हसति मृन्मयाधारभूता चिन्मयी मम जननी । दुःखं संसारवृत्तान्तं नाहं कदाचन तस्यै वक्तुं पारयामि पारयिष्यामि वा । नाहं कदाचन मातृसमीपे आत्मानं प्रभावयितुं शक्ष्यामि । कदापि न ।

श्रीरामकृष्णः । (सस्मितम्) यतस्त्वं मातृसकाशे संसारसुखार्थं नावेदितवान्, तवादृष्टे संसारसुखं नास्ते लिखितमिति निश्चितम् एव । तथापि मत्प्रार्थनया जननी तथा विधास्यति, यथा कदाचन तव परिवार-जनस्यान्नकष्टं न स्थूलतो भवेत् ।

नरेन्द्रः । देव ! वाढम् । तदेव यथेष्टम् । धर्माचरणविषये दृढमभिनिविष्टोऽतः परमहं भविष्यामि । (स्तुतिमुखेन)

मनश्चिन्तयात्म — विकासनम् ।
तमस आगमन तमसि पुनर्लोपन
मध्यपथे नूनं दुःख-घूर्णनम् ॥ ६४
वहति समीरणः कूजति खगगणः
विकाशते पुष्पदल विमलम् ॥

अमलकमलदल-क्षणिकशोभनजल
यथा तथैतज्जगति सकलम् ॥ ६५
भागवतकृपावल-ब्रह्मभावामलामल—
महाबलो गुरुर्मया प्राप्तो यदि रे।
तस्य पादपद्मतले विश्वशश्वत्पुण्यफले
राजे क्षुद्ररेणुसमोऽहं नरेन्द्रो रे॥ ६६

श्रीरामकृष्ण । सर्वमितन्मम गभीरानन्दाय । ब्रह्ममयो भूत्वा हे शिव! जगतोऽशेषकल्याणसाधन त्व कुरु ।

पुन शृणु नरेन्द्र । वैष्णवा उपदिशन्ति "नाम्नि रुचि, जीवे दया, वैष्णवपूजनञ्च" इति । "अभेदो नामनामिनो" रिति सानुराग नाम जपनीयमेव । किन्तु जीवे दयेत्येतत् किम् ? (समाधिभावमापन्न)।

(धीर नि श्वस्य) जीवे दयेत्येतन्मह्य न रोचते । कीटाणुकीटजीव. कथमन्यस्मिन् दयेत ? कस्त्व नाम दयाप्रदर्शनाय ? नहि, नहि, नरेन्द्र! जीव दयेति न, शिवज्ञानेन जीवा सेवनीया इत्येव युक्तम्।

नरेन्द्र. । अहो महामहिमा श्रीगुरुदेवस्य वचस । नवनवतमालोको मयाऽद्य लब्ध । अत एतदायाति विश्ववासिन कीटपतङ्गादय सेवनीया. पूजनीया इति ।

अनेनोपायेन काननस्य वेदान्तशास्त्र गृहे आगमिष्यति, जीवने मनुष्य रूपेण वेदान्तोपदेशा परिपालयिष्यन्ते।

धन्योऽद्य चिरकल्याणी गुरोश्च स्नेहसबल. ।
वेदान्तलोक-माहात्म्य-परिज्ञान-सुमङ्गल ॥ ६७

(ध्यायन्) अहो जानि भवतारिणि । अहो स्नेहमय कल्याणमय परमगुरो ! सत्य नु धन्योऽस्मि—

(पुनरपि ध्यायन् गायति)

मा शुन वक्ष्यानुज (ब्रह्ममयि)
पुन मंदिरे मातज्ञान-विचारे ।

तव हि प्रेममदिरा–पानेनास्मि मदातुरो
रे मातः ! भक्तचित्तहरे मज्जय प्रेमसागरे ॥ ६८
तवोन्मादकारागारे हसति कोऽपि क्रन्दति रे—
नृत्यति कोऽपि वाऽनन्दभरे ।
ईशामुसाश्रीचैतन्या (रेऽम्ब !) प्रेमभरेऽचैतन्या
अहो कदाऽम्ब ! भवेय धन्यो मिलित्वा तदभ्यन्तरे ॥ ६९
स्वर्गे नृन्मत्तमेला समगुरशिष्यचेला
प्रेमखेला बोधस्यापारा रे ।
त्व प्रेमोन्मादिनी मातोन्मादशिरोमणिः
प्रेमधनिन कुरु मातर्मां दीनप्रेमदास रे ॥ ७०

समाप्त चतुर्थ-दृश्यम ॥

—०—

पञ्चम – दृश्यम् ।

[(मिश्र) विष्कम्भक]

श्रीनरेन्द्रस्य विवाहार्थं घटकापचार ।

तत्र माल्यकार, नापित, घटकश्च ॥

स्थान— दक्षिणेश्वरे मन्दिरस्य पार्श्वदेश ।

समय — पूर्वाह्णे ऽष्टघटिका ।

नापित । माल्यकार । यथैव सूर्यदेवस्तर् तर्तर् तर्गत्या ऊर्ध्वं गच्छति हसति लसति तपति च, तद्वन्ममानन्दोऽपि ऊर्ध्वगामी राजते । पादनखादारभ्य नाभितलतो मस्तकमारोहति ।

माल्यकार । भ्रातर्नरपुङ्गव । तत् कथम् ? अपि प्रयत्न कथन सफलीभूत ?

क्षुर करे शाणितमाददानो
गृहान्तर त्व गृहतोऽभ्युपैषि ।
वितत्य सत्यानृतजालयन्ध
जगन्ति विश्रामयसि प्रमोहान् ॥ ७१

अपि च—

विधाय कर्णोपरि क्षुरखुराख
विवादमुत्पादयसीह सन्ततम् ।
एव स्वमर्थं वहुधा वितन्वतो
नितान्तशुद्ध किल जातिकर्म त ॥ ७२

अथवा घटकनिपुणस्त्व मवमघटन घटयसे ।

नापितः। अये माल्यकार! शोभनकर्मकरस्त्वं मा निन्दसि? पुनर्नरसुन्दर मा नर-पुङ्गव च कथयसि?

घटकः। (स्वगतम्) अहो! नापितस्य शाणितं नरपुङ्गव-शब्द-मार्गेण चट्चटायते। यतः क्षुर हस्ते वर्तते, जगदेव क्षुरतलगतमिव मन्यते। पुनर्मालाकरकर्म निन्दितमुचित आस्ते। भवतु, उभौ मम सहायकौ। नाहमेतयोर्विवादे किमपि वच्मि।

नापितः।

कण्टकैः कण्टकं हृत्वा शोभसे माल्यकर्मणि।
गृहाद् गृहान्तर गत्वा करोषि रूपमर्पणम्॥ ७३
घटकाय निवेद्याहो रूपमम्भारभारतीम्।
कष्टं यापयसे नक्तं दिवसे माल्यसुन्दरः॥ ७४

घटकः। अये कण्टकोद्धार! अये नरकर्णेजप! नैष समयोऽस्माक-मात्मकलहवृद्धये। साम्प्रतमदूरस्थ-विश्वनाथदत्त महोदयस्य ज्येष्ठपुत्रेण सह दशसहस्रमुद्राविनिमयेन सम्मान्यस्थेन श्रेष्ठि-महोदयस्य कनकचम्पकदाम गौर्याः कन्यकाया विवाहवार्ता प्रसरति। त्वयैव समरन्ते कलहाय? श्रूयते किल—

"कन्या कामयते रूपं माता वित्तं पिता गुणम्।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः॥"

तदन्तता मिष्टान्नमवश्यं प्राप्य सर्वेषां युष्माकं स्वार्थविक्षेपेनान्यत् मरणम्॥

नापितः। किन्तु जामाता स्वयं किं वाञ्छति? यथाऽस्मिन् व्यापारे स्वयं नरेन्द्रनाथोऽस्माकं युवकोत्तमो जामातृधुरन्धरः?

माल्यकारः। घटकमहोदय! तत्रैव महती विप्रतिपत्तिः। अन्यथा कथं वयं परस्परं विवदमानौ भवावः। एष द्विखण्डितमस्तकनीमः पटोल-सदृशचक्षुर्महासाधुर्निवाहभयधुम्रूपीती राजते। मीलितविकटिशानिवाऽसौ "नाहं कदापि विवाहे प्रवर्तिष्ये" इति च कथयति।

घटक. । अहो तेन किम् ? कति कति भगवदवतारा महापुरुषा अस्माभिः कृता विवाहपाशबद्धा, क. पुनरेष महावतारोऽस्माभिर्यौद्धुमुपागतः ?

त्रातारौ भुवनस्य यावभवता कालक्रमाद् भूतले
देवौ बुद्धमहाप्रभू, न किल तावापादितौ बन्धनम् ?
कोऽय भालतटे दिशा समुदित. श्रीमान् नरश्चन्द्रमा
यस्तिष्ठेत् सुचिर विवाहविमुखो मय्यास्थिते वादिताम् ॥ ७५

एव सर्वे कुर्वन्ति। किन्तु वारमात्रकथनेनैव मत्स्या यथा आमिषं तथा एते भाविजामातृपुङ्गवा नारीलोभन गिलन्ति कटिदेशपर्यन्तम्— तत् कुतोऽयं विश्वनाथपुत्रो विलेवरः स्वनामधन्य-महापुरुष. ?

नापितः। किन्तु भ्रातः घटकवर ! एष अक्षोटकोष इव सुतरां दृढतर इति ध्रुव जानीहि। अन्यथा कथ स्वय विश्वनाथदत्तस्य पत्नी चिरहताशा राजते। कुटुम्बाश्च सर्वे कथयन्ति श्रीदक्षिणेश्वर-रामकृष्ण-ठक्कुर महोदयससर्गादेष जातः प्रस्तरः, मातुश्च चक्षुर्जलसागरमेष मुहुर्पेक्षते इति। काले सर्वं संभवतीति जानीहि ।

घटकः। घटना कठिना जाता मर्मोपेक्षणकारणात्।
बुद्धिकोटिप्रकाशेन साधये कार्यसततिम् ॥ ७६

नापितमाल्यकारौ ॥

घटके घटनावृत्ति र्जायते सुतरा भुवि ।
पृथ्वीतल तथा चास्ते घटकाना कराद्धि. ॥ ७७

आयातीव स रामकृष्णदेव सशिष्य. । तत्पलायामहे वयम् ।

(सर्वे निष्क्रान्ता.)

(समाप्तो विष्कम्भकः) ॥

—॥ दृश्यान्तरम् ॥—

[खीष्टाब्द—१८८५ मार्चमासस्य एकादशदिवस ।
स्थानम्—दक्षिणेश्वर काली-मन्दिरस्थ श्रीरामकृष्णकक्ष ।
श्रीरामकृष्ण—नरेन्द्र—गिरीश—राम—हरिपद—बलराम—
मास्टारमहाशया प्रविशन्ति]

रामकृष्ण । (सङ्गीतम्)

सयतनं कुरु हृदये आदरिणीं श्यामाम्बिकाम् ।
मन. त्व पश्य, पश्यामि चाहं, नान्य. कोऽपि पश्यतु ताम् ॥ ६७
वञ्चयित्वा कामादिकम् एहि मन एकाकि त्व
रसना सह तिष्ठतु नाम्नाह्वयतु हरदयिताम् ।
(मातर कातर भक्तिभाविताम्)
कुरुचि-कुमन्त्रि-दल
दूरे कुरु सदा खल
प्रहरि कुरु ज्ञानाक्षि, सावधान वन्दस्व ताम् ॥ ६८

भो नरेन्द्र ! भो गिरीश ! भगवतो नवावतार विषये युवयोर्द्वयोर्महन्मतानैक्य वर्तते । तद्वाञ्छामि, एतद्विषयक युवयोर्वाग्-युद्धम् ।

युवा कुरुत विचार—भगवतो नवावतारत्व सत्यत्वेन ग्रहणीय न वा ? नरेन्द्र । प्रारभस्व ।

नरेन्द्र. । ईश्वरोऽनन्त । तस्य स्वरूपनिर्णये कथ वय समर्था भवाम ? ईश्वरो वर्तते सर्वेषा हृद्देशेषु, जन विशेष कथ स स्वकारमना परिगृह्णीयात् ?

श्रीरामकृष्ण. । (सस्नेहम्) नरेन्द्रेण साकमास्ते मम मतैक्यम् । भगवान् सर्वत्र विराजते किल । किन्तु प्रकाशस्य तस्य तारतम्यमपि

विद्यत सत्यम् । शक्तेविशेषप्रकाश स्यादेव । कुत्रापि भगवतोऽविद्याशक्तिरूपेण पुन कुत्रापि वा विद्याशक्तिरूपेण। केषुचन आधारेषु शक्तेराधिक्य, केषुचन पुन शक्तेर्न्यूनत्वम्। तत सर्वे मानुषा न हि समाना ।

राम । एतेन निरर्थकतर्केण किम् ?

श्रीरामकृष्ण । (सक्षोभम्) नहि, नहि, आस्तेऽस्य प्रयोजनम्।

गिरीश । कथ त्व जानासि स देहान्विता नायाति ?

नरेन्द्र । भगवान् अवाङ्मनसगोचर ।

श्रीरामकृष्ण । नहि नरन्द्र । ईश्वर शुद्धबुद्धेर्गोचर । शुभबुद्धि शुद्धात्मा च समौ। ऋषय शुभबुद्धय शुद्धात्मान शुद्धात्मानमपश्यन्।

गिरीश । (नरेन्द्र प्रति) मनुष्यावतार विना मानुषान् को बोधयेत् ? मानुषेभ्यो ज्ञानभक्तिदानाय तस्य नराकारेण प्रादुर्भावोऽवतारत्वेन अभिधीयते । अन्यथा क शिक्षयेत् ?

नरेन्द्र । कथम् ? अन्तस्थोऽसौ बोधयेत् ।

श्रीरामकृष्ण । (सस्नेहम्) अथ किम् ? बाढम् । अन्तर्यामी भूत्वाऽसौ बोधयत्।

नरेन्द्र । गिरीशचन्द्र। पश्य, पाश्चात्यपण्डिता अन्येनमन्तरूप वर्णयन्ति । ह्यामिल्टन—टिण्डाल—हार्बार्ट स्पेन्सार—हाक्सलि—प्रभृतीनां मतमनस्य ग्राह्यम् ।

श्रीरामकृष्ण । (माष्टारमहाशयमुद्दिश्य) मास्टार । नैतदालोचन मह्य रोचते। अन्येषां मतेन किम् ? स एव सर्व तत्र क सन्देह ? यत स्वचक्षुषैवाह तथा पश्यामि । सर्वमेव तदात्मकम् । तदेव सत्य तदेव सत्यम् । एकस्यामवस्थायामखण्डे मनोबुद्धी निलीयेते । यथा नरेन्द्र दृष्ट्वा मम मनोऽखण्डे लीनाति । (गिरीशमुद्दिश्य) अप्येतत् सम्यक् त्वया बुद्धम् ?

गिरीश । एतद्विनाऽन्यत् सर्वमपि मया बुद्ध प्रभु ।

श्रीरामकृष्ण । अह पश्यामि किल—

सर्वो वस्तुचयः स एव भगवानित्यत्र कः संशय-
श्चैतन्योदयमन्तरेण न पुनः स ज्ञायते केनचित् ।
चैतन्यश्च कुतो विना करुणया तस्यैव सर्वात्मनः
सम्पन्नस्तु समाधये स हि भवेच्चैतन्यलाभे सति ॥ ९९

प्रमादो जायते देहविषयेऽपि । अनासक्तिश्च कामिनीकाञ्चनयोः । भागवत कथां विना नान्यत् किमपि तस्मै रोचते, विषय कथया च जायते तस्य कष्टम् ।

यदि स कृपया स्वकीयावतारित्वे प्रबोधं जनयति, तदा न सन्देह उदियात् तस्यावतारित्वविषये। यथान्धकारे घर्षणानन्तरं दीपशलाकामूलेऽग्नेरुद्गमः। एवं तस्यालोको दृश्यते चेज् जायते सन्देहस्यावसानम् । विचारेण नासौ कदापि परिज्ञेयः ।

(नरेन्द्रं प्रति परम समादरः)

नरेन्द्रः । कालीध्यानं दिवसचतुष्टय मया कृतम् । किन्तु नाभिनव किमपि संघटितम् ।

श्रीरामकृष्णः । कालेन सर्वं भविष्यति । तत् ब्रह्मैव काली । काली याद्या शक्तिः । अग्नेर्दाहिकाशक्तिरिव ब्रह्मणोऽपि कालिका शक्तिः । नास्ति उभयोर्भेदः कश्चन ।

नरेन्द्र ! भगवद्विषये विचारनिर्भरो मा भव ।

तावद् भोजन-मन्दिरे कलकलः संश्रूयते सर्वतो
यावत् सर्व-निमन्त्रिता नहि भवन्त्याहारकृत्ये रताः ।
भुञ्जानेषु निमन्त्रितेषु घटते कोलाहले मन्दता
पात्रे दध्नि समागते पुनरहो सुप्सुप्-रवः केवलम् ॥ १००

तथेशमाप्तुं विहिते प्रयत्ने
स्यादप्रवृत्तिः क्रमशो विचारे ।
ईशे च लब्धेऽङ्ग विचारलोप-
स्तदा तु निरुपधिकः समाधिः ॥ १०१

तन्नरेन्द्र ! सावधानं शृणु, एतदित्थं भवति—

निमन्त्रितानां भोजनप्रारम्भे कलकलः, आहारे प्रारब्धे शब्दमान्द्यम्, आहारस्यान्ते केवलं सुप् सुप् रवः ; तद्वत् भगवत्प्राप्तिप्रयत्नविषयेऽपि, प्रथमतो विचारकोलाहलः, तदनन्तरं क्रमशः शब्दाभावः, अन्ते च निद्रासमाधिः ।

अपि सम्यग् बुद्धम् ?

नरेन्द्रः । बुद्धमेव ।

(श्रीरामकृष्णः नरेन्द्रं पर समाद्रियते)

हरिः ॐ, हरिः ॐ, हरिः ॐ

(आनन्देन नरेन्द्रो गायति)

दुःखैकभञ्जन प्राण-विमोहन दर्शन-दानानुरञ्जन
लुप्तशोक-सप्तलोक-पुण्यानन्द-वर्धन
क्वाह दीनहीनजनो दीनातिदीनः ॥ १०२

(श्रीरामकृष्णः समाधिस्थः । जाते समाधिभङ्गे)

रामः । देव ! संसार-लिप्तानामस्माकं क उपायः ?

रामकृष्णः । कथम् ? सरल उपायः । संसार-निवासिनां किञ्चिन्मादकत्वं प्रयोजनम् । भवतु नाम साधनं किन्तु मादकत्वम् अवश्यमेव स्यात् । यूयं न शुकदेवाः । पथि कानने यत्र तत्र वा वस्त्रहीनानां यथा, तथा युष्माकं स्थितिर्न युज्यते किल ।

तथापि भगवदुद्देशेनाङ्गीकार-पत्रमेकमवश्यमेव देयम् । भगवान् यथा तथा वा विदधातु तदवश्यमेव ग्रहणीयं स्यात् । भवसि किल त्वं धनिजनस्य दासवत् । यः कार्यकाले गृहस्थस्यापत्यादिकं स्वपुत्रस्यावत् पालयति तथा भाषणादिना तोषयति च, किन्तु कार्यावसाने किम् ?

दासः स्वापत्यबुद्ध्या व्यवहरति यथा सन्ततिष्वीश्वरस्य
संसारं सेवमानः पश्यतु निजदशां तादृशीं त्वं विवेकात् ।
रोषाद्वेत्यन्तरगाद् वा च्यवयति यदि तं स्वप्रभुः स्वाधिकारान्
सम्बन्धस्तत्सुताद्यैः सह चिररचितस्तर्हि विच्छेदमायात् ॥ १०३

पनस भक्षण समये तैलमपेक्षितमेव । तद्वत् निरासक्ति—तैल ससार—भुक्तौ स्वकरे विलेपय—आसक्तिर्निश्चित दूर यास्यति ।

अह गायामि, यूयमपि मातृचरणारविन्द वन्दध्वम् ।

सङ्गीतम्

भीम पलश्री—एकताला

भो आनन्दमयि ! माता त्वमयि मा कुरु मामानन्दहीनम् ।
तव श्रीचरण विहाय मम मनो जायते सत्य तत्त्व-दीनम् ।
तपनतनयो गतप्रणयो धिङ्मा बुद्धिहीनम् ॥ १०४
धृत-भवानीनाम-भवोद्धारकाम. करिष्यामि भवोत्तरणम् ।
अकूल-सागरे मातर्मज्जेयं रे स्वपनाद् दूरतर स्वपनम् ॥ १०५
अहर्निशमह श्रितो दुर्गा-नाम, तथापि दु.खस्य मा भूद् गणनम् ।
यद्यह म्रिये भो भो हरप्रिये तत्र दुर्गानाम्न. शेषणम् ॥ १०६

समाप्त पञ्चमं दृश्यम् ।

—०—

षष्ठ-दृश्यम् ।

[रामकृष्णत्व विषये श्रीपरमहंसदेवस्य स्वकीया स्वीकृतिः ।

समयः—१८८६ खीष्टाब्दः—परमहंसदेवस्य महासमाधेर्दिनद्वयात् प्राक् ।

स्थान—काशीपुरस्थ-भाटकप्राप्त-गृहम् ।

गलक्षतरोगग्रस्तः श्रीरामकृष्ण परमहंसदेवः]

परमहंसदेवः । (स्वगतम्) अहो महासौभाग्यं मम यत् सर्वस्वं दत्त्वा साम्प्रतमहं रिक्तहस्तोऽस्मि ।

योगादिक्रियया चिरेण खलु या शक्तिर्मयोपार्जिता
दत्ता प्राग् दिवसद्वयाद् गुणवते श्रीमन्नरेन्द्राय सा ।
रिक्तः साम्प्रतमस्मि यद्यपि तथाप्यास्ते न दुःखं मनाक्
शान्तिं प्रत्युत काञ्चनाञ्चति मनः सत्पात्रलाभेन मे ॥ १०७

शुद्धसत्त्व एष शिवावतारसदृशो नरेन्द्रोऽदूरे भविष्यति मच्छक्तिप्रवृद्धवचनो निखिले विश्वे भारतधर्मदर्शन माहात्म्ये अतुलप्रभावेन प्रोद्घोषयिष्यति । नर-नारायणसेवातत्त्वञ्च विश्वस्य श्रेष्ठतत्त्वेन प्रभुवमेव प्रचारयिष्यति, निश्चितं सार्थकनामश्च भविष्यति ।

(ततः प्रविशति जननी सारदामणिः)

रामकृष्णः । विश्वकल्याणसाधिनि ! मत्समीपे उपविश ।

सारदामणिः । तथा करोमि । किन्तु नाथ ! शून्यमिव सर्वं मम प्रतिभाति । उत्तापनशक्तिरहिताऽग्निः, शैत्यरहितश्च पवनो माध्यन्दिनमार्तण्ड-सदृशोऽपि दहति नितराम् । सर्वे भक्ताः क्रन्दनोन्मुखा इतस्ततोऽनाथा इव विचरन्ति । हे सर्वमङ्गल भगवन् ! सर्वेषां हितायैव संसारस्य [illegible]-गमनदर्शनम् ।

परमहंसदेवः । देवि क्षेमकरि परमहंससमाधनसम्पन्न ! शृणु मद्वचनम् । एते सर्वे मम भक्तपुत्राः कथमनाथा भवेयुः ? अनाथः स यस्य मातापितरौ न विद्येते । मम महाप्रयाणानन्तरं विश्वजननी भूत्वा त्वमेतान् सर्वान् परिपालयिष्यसि । पुनश्च शृणु—

तदा सुतोऽनाथ इति प्रतीत
आस्ते जनन्या रहितो यदा सः ।
पितुर्वियोगात्तनयस्य दुःखम्
अनाथता तस्य तु मातृनाशात् ॥ १०८

मातृहीनो जनोऽनाथः, पितृहीनो जनो दुःखभाग् जायते खलु । मातृहीनः प्रायेण मृत एव ; पितृहीनस्तु तेजोहीनः केवलम् । देवि ! जानीये मातृवक्ष एव सन्तानानां चिरसुखस्थानम् ।

सारदामणिः । किन्त्वेकाकिन्यहं कथमेतेषां सर्वेषां सहायो भवेयम् ?

रामकृष्णः । त्वयि जीविष्यामि अहमपि ध्रुवम् । तव चिन्तासु कर्मसु ध्यानेषु धारणासु नितरां जीविष्याम्यहम् । तव जीवने मम च कुत्र वा भेदः ?

(ततः समायातश्चिकित्सकवरः डक्टर महेन्द्रनाथ सरकार-महोदयः)

डाः सरकारमहोदयः । (बहिर्देशात्) अभ्यन्तरमागन्तुमादिष्टोऽस्मि ?

(जननी सारदामणिः झटिति बहिर्गच्छति)

परमहंसदेवः । कथं न ? सर्वे स्वस्वकर्मसाधनमवश्यमेव कुर्यात्, कर्मणा कर्मभोगशान्तिः ।

डक्टर-सरकारमहोदयः । (प्रविश्य) किन्तु भवान् आत्मानं रोगशान्तौ नानुकूली-करोति चेत् किं वयं कुर्मः ? इच्छाशक्तिर्बलीयसी । विशेषतो भवादृशानां महापुरुषाणाम् ।

परमहंसदेवः । डक्टर महोदय ! पश्य पश्य—

यदुषसि समुदेति प्राचि रागोऽरुणस्य
यदुत दिवसशेषे लोहिताभा प्रतीच्याम्।
प्रवहति पवनो यच्चन्द्रसूर्यौ च भातः
कलय ननु तदेतत् कस्य वा शासनेन ॥ १०६

सर्वं तस्यैवेच्छया सघटते खलु।

डक्टर-सरकारमहोदयः। किन्तु भवादृशा महान्तो न सर्वसाधारण-नियमापेक्षिणो भवेयुः।

रामकृष्णः। चिकित्सकवर! जानामि किल—

आत्मानमार्पयमहं करयोर्जनन्या
न स्वेच्छया किमपि कर्तुमहं प्रवर्ते।
विश्वं चराचरमियं सुनियन्त्रयन्ती
यन्मे हितं भवति तन्नियतं विदध्यात् ॥ ११०

स्वेच्छया नाहं किमपि कर्तुं वाञ्छामि

डक्टर-सरकारमहोदयः। किन्तु भवान् स्वल्पं भाषतामिति मम ऐकान्तिकी प्रार्थना। कठोरे रोगेऽस्मिन् भवान् निरन्तरमालपनादिकं करोति चेत्, चिकित्सकः किं करिष्यति?

रामकृष्णः। तत्रापि भगवत्या इच्छा बलवती। साऽदिशति, करोम्यहम्। यथा नरेन्द्रनाथोऽस्मिन्नेव क्षणे मया शिक्षणीय एव। तद्भवान् बहिर्गमनसमये तं चिन्तनक्लिष्टमनः सम्प्रेषयतु।

डक्टर-सरकारमहोदयः। बाढम् (बहिर्गच्छति)।

रामकृष्णः। (स्वगतम्) अवश्यमेवास्य नरेन्द्रस्य हृदयाभिलाषं पूरयिष्यामि।

(ततः प्रविशति नरेन्द्रनाथः)

रामकृष्णः। नरेन्द्र! शृणु। न निरर्थकं चिन्तन-क्लिष्टो भव। ममावतार-विषये सन्देहयुक्तं तव मनश्चेद् ब्रवीमि—

त्रेतायामवतारो यो यः पुनर्द्वापरे युगे।
एकीभावमनयोर्नीतः रामकृष्णः किलास्म्यहम् ॥ १११

नरेन्द्रनाथ । (स्वगतम्) कथ गुरुदेवो मम चिन्तनविषय समग्रमेवाविकल जानाति ? सत्यमेव त्रेताद्वापरलीलाचतुरो नरविग्रहधारी स्वय भगवानेष ।

(साष्टाग प्रणम्य)— परमदेवदेव । भृश कृतार्थोऽस्मि । तव शिक्षा एव मम परम बलम् । तामेव विश्वस्य सर्वत्र प्रचारयिष्यामि ध्रुवम् । नाह पर्वते निगूढो भवेय साधारण-सन्न्यासिवत् ।

त्वद्दत्तामधिगम्य शक्तिमतुला विद्या त्वया शिक्षिता
लोके ख्यापयितु गृहीतशपथो यत्न विधास्ये परम् ।
सोऽह केवलमात्ममोक्षणपर ससारकोलाहलात्
अत्येष्यामि न जीवन शमधन सन्न्यासिसाधारणम् ॥ ११२

अपि च—

त्वन्मन्त्रप्रतिसस्कृतेन मनसा काषायवासो दधद्
धर्मक्षेत्रमशेषभूमिवलय सपादयिष्येऽचिरात् ।
त्वद्व्याख्यामृतबृहित विरचयन् वेदान्तभाष्य नवम्
उच्चैर्भारतवर्षदर्शनकथा विस्तारयिष्ये क्षितौ ॥ ११३

रामकृष्ण । निश्चित जानीहि, तव करयोरह न्यस्तोऽस्मि । त्व यत्रैव मा नेष्यसि, तत्रैवाह यास्यामि । त्व सार्थकप्रयत्ना नितरा भविष्यसि ।

(श्रीनरेन्द्रो गायति)

जीवननदी मम वहति क्षुरधारा ।
मध्यपथे प्राणतरणी विकर्णधारा ॥ ११४
ऊर्मिमाला दोललोला झञ्झामारा ।
नीलनीलाकूलजल-लुप्त-पारा ॥ ११५
तीरे क्वापि भाति दीप्तिराशासचारा ।
आशीराशिर्नक्तोत्तरा दु सहरा ॥ ११६
इष्टदेव-नामसुधा वर्षाकारा ।
विश्वविप्लावनपरा प्राणाकारा ॥ ११७
सुधा क्षरतु लोकेऽतुलाऽपारा ।
दु खदैन्य-पारावार-पारकरा ॥ ११८

समाप्त षष्ठ - दृश्यम् ॥

सप्तम - दृश्यम्

[समयः— पूर्वाह्णः ।
स्थान— घुघुडि ग्रामस्थस्य कस्यचन भक्तस्य गृहम् ।
श्रीमाता, ग्राम्यनार्यः काश्चन, गोलापाम्बा, योगीन्द्राम्बा]

[भागीरथी पश्चिमतीरस्थ-घुघुडिग्रामे स्वामिजि महाराजेन सह मातृ साक्षात्कार, महाराजस्य दीर्घकाल प्रवास प्रार्थनं च]

श्रीसारदामणि। अहो समायाता मनोहारिणी ऊषा ।
श्वेताम्बरा वरारोहा रक्तललाटशोभना ।
भास्करारात्रिकस्थाली कूजनशङ्खनादिनी ॥ ११९
मालयचामरोपेता मेघालिपुष्पभूषणा ।
ऊषा स्वर्णमहीकन्या प्रादुरेति दिगङ्गने ॥ १२०
अदूरे प्रवहति खरतरा भागीरथी-धारा
पतितपावनी कलुषनाशिनी कल्याणसारा ।
हरजटाजूट-मन्थनसंघट्ट-रसित-स्नेहाकारा
कालकालकाल-लुटनातुल-प्रवाहाकुलापारा ॥ १२१

जननि भागीरथि । मम नाथो भक्तसन्तानान् सर्वान् मम हस्ते न्यस्तवान् । नक्तंदिव चिन्तयामि तेषां हितानि । अहो ! अतुलनान्येषां सन्तानानां सर्वेषां हृदयानि । स्वमातृः परित्य समागताः सन्ताना मे मां दृष्ट्वा समग्र विश्व विस्मरति । मम हर्षवर्धनाय किं किं ते न कुर्वन्ति । (उर्ध्वं विलोक्य स्वामिनमुद्दिश्य)

दयस्व दास्या मयि नाथ तादृशं
यथा हि सन्ताननिकाय एष ते ।

हिमातप्याभ्यां स्वशिरासि गोपयन्
क्षमेत सम्पादयितुं सुजीविकाम् ॥ १०२

माताऽहं, मयि तिष्ठन्त्यां न मे कश्चन सन्तानो विपद्येत । अहो सुवर्णचन्द्रमोनिभोऽस्मत्सुतो नरेन्द्रः सर्वेषां भ्रातॄणां हितसाधनाय विश्वस्य कल्याण-सम्पादनाय, नाथस्य धर्मप्रपञ्चनाय च किं किं न करोति ?

नाथ श्चितमेतेषां मङ्गलं विधेहि ।

(ततः प्रविशन्ति काश्चन ग्रामस्था नार्यः)

गोलापाम्बा । अहो साम्प्रतं प्रारभते जनारण्य-मृदुवात-प्रवाहः ।

योगीन्द्राम्बा । पुनः शीतल चन्दनद्रुमसमाश्रयिपन्नगानां सुरभि-निःश्वासो मा अस्मान् व्याकुलीकरोतु ।

सारदामणिः । मा मैवं भण ।

हिंसा सम्प्रति वर्तते क्षितितलं दुःखेन नैकात्मिना
दूरीकर्तुमिदं मयाऽवहितया भाव्यं हि नाथाज्ञया ।
देवादिष्ट-पथे नितान्त-सरले सर्वैः समालम्बिते
हिंसाद्वेषविहीनमाशु भविता विश्वं सुखैकास्पदम् ॥ १०३

काचन शिष्या ।

ग्रामोऽस्मदीयो नितरामधन्यः
स्पर्शेन ते मातरभून् कृतार्थः ।
पुण्यात्मना पादरजोभिरेषा
मार्गोऽपि जातोऽस्य सुराध्वतुल्यः ॥ १०४

अन्या काचन । केचन कथयन्ति—पितुरपि माता गरीयसी–अन्धकाणखञ्ज सन्तानान् प्रति स्नेहाधिक्यहेतोर्निश्चितम् ।

अमृत .महितं सागरजननं
मातरि निहितं तुलनाहीनम् ।
'मा'क्षर-कथनं कल्मषदहनं
"तृ" सदा भवाब्धि-तरणे तरणम् ॥ १०५

सारदामणि । सरले ! मा मैव भण। नाथो मे सर्वम् । अह दीनहीनाऽखलाऽवला सरला बाला, न तु सबला, केवल नाथस्य बलेनोद्बुद्धा। देवी ज्वालयति चेत् किञ्चिञ् ज्वलामि न वा नाह जाने । केवल जानामि नाथादेशात् करोमि सर्वम् ।

गोलापाम्बा । मात ! य योगानन्दमहाराज श्रीठक्कुर स्वय नोद्धृतवान् तस्मै त्वमेव कृपां दर्शितवती ।

सारदामणि । तदपि ठक्कुरस्यादेशेनेति न विस्मर्तव्य श्रीमत्या ।

योगीनाम्बा। आदेशोऽस्तु वा न वा, वय जानीमहे माताऽस्माकमतुलनीया, ठक्कुरस्य पूर्णसाधनामूर्ति, केवल वदनावरणवस्त्राभ्यन्तरे लुक्कायितस्वरूपा।

काचन ग्रामीण-नारी। जननि जगदम्बिके ! त्वदागमनानन्तर मम ग्रमन्न जात तथा चास्माक सर्वासा भाग्यगगनम् । सर्वत्र राजते मधुर रौद्रच्छवि विजनमनोहरा सञ्जीवनतत्परा । गन्धराज-कुरुवकाशोक यूथिका-मालिका दोदुल्यन्ते सर्वत्र रज्यत्कण्ठा नीलकण्ठा अत्यूर्ध्वोत्तोलित पुच्छमालिका नृत्यन्ति । उद्गतरोम विकाशडम्बर कदम्ब सम्भारो धरिनी रञ्जयति चित्रापित रोमाञ्चिताम्, पुष्पे पुष्पे तव स्मितरेखा, शष्पे शष्पे तव पादसञ्चार-मृदुकम्पन, पतत्रिशिञ्जने तव नाथ-'ठाकुर'-नाम-जपध्वनि ।

धर्मस्तवैष निजरूपनिगूहन यत्
सुप्त जगद् भ्रमतु तेन विलुप्त-बोधम् ।
ग्राम्या वय भगवतीं भवभीतिहन्त्रीं
जानीमहे जननि ! तामिह सारदा त्वाम् ॥ १२६

सारदामणि । नार्यो यूय कथमधन्या भवेत । नाथस्य मम सरल पन्थानमनुसरत, सर्वासा युष्माक चित्ते चिराय राजिष्यतेऽनिवार्या शान्ति ।

(सर्वा वहिर्गच्छन्ति)

(दूरान् मातर पश्यन् स्वामीजिराकुल प्रविशति)

श्रीमाता । अहो ! मनो मम सूचयति, मम प्राणधनपुत्रो नरेन्द्रोऽ-

द्यैवास्मिन् स्थाने समागच्छन् ममानन्दातिशय्य सजनयिष्यतीति। पुनो मम सर्वेषां गुरुभ्रातृणा तथा जगत सर्वेषा च हितार्थ निखिल भारत परिभ्रमिइकामोऽपि मातृस्नेहच्छायालाभादिव वङ्गदेश प्रत्यागत। नाय! पुनर्वदनारविन्द सदर्शन कदा नु मम घटेत ?

स्वामीजि। (त्वरित प्रविश्य प्रणम्य च)–

सार्थक जन्म मे मात तु तूपादपद्मदर्शनात्।
धन्योऽय घुघुडिमामो यत्रास्त सारदाऽम्बिका॥ १२७
ग्रहा उपग्रहा सर्वे दवाश्च वासवादय।
पालयन्ति तवादेशं नक्त दिव सुरोत्तरा॥
दीनहीन-सुतस्याम्ब गृहाण कोटिशो नतिम्॥ १२८

सारदामणि। सुत नरेन्द्रनाथ। पितर श्रीश्रीठकुर वन्दस्व। अवला नार्यह किं कर्तुं पारयामि ?

नरेन्द्र। विना कारण मात। न श्रीठकुर "फलहारिणी" काली पूजादिवसे तव श्रीचरणयो द्वादशाब्दव्यापि जपहेतुक माल्यवर समर्पयामास।

आध्यात्मिकादि-वहुदु ख-विमोक्षहेतु-
स्तातो ममाविरभवत् सुत-सग्रहार्थम्।
माता पुनस्त्वमपि भाग्यवशात् सुताना
सरक्षणाय विधिना प्रणिधीकृताऽसि॥ १२९

मम माता पितुरपि शतशो गरीयसीति ध्रुवमह मन्ये।

सारदामणि। तात नरेन्द्र। श्रीश्रीनाथस्य मम प्राणठक्कुरस्य धर्मा दर्शन च विश्वस्य सर्वत्र भवतु प्रचारितम्। यहा कठोरो न्यासो मयि त्वयि च निहितस्य ससुल्लास प्रदर्श नाथ। श्रीठक्कुरस्या भिलापश्चिर विजयताम्।

स्वामीजि। मात! पश्य। श्रीठक्कुरस्य निर्देशपालनमेव मम जीवनस्य केवल व्रतम्।

सारदामणि. । किन्तु कथ नरेन्द्र त्व तथापि परमुद्विग्न इव लक्ष्यसे ?

स्वामीजिः । विश्वजननि मात । भवत्याः पादपद्मे निगूढ़-मात्माभिलषित निवेदयामि । मात, प्रार्थये यावत्कालपर्यन्त भगवत श्रीगुरुदेवस्य सङ्कल्प न कार्येण रूपायित करिष्ये तावन्नाह प्रत्यावर्तिष्ये।

(साष्टाङ्गम् प्रणिपत्य) जगदम्बिके । आशिषो देहि, यथा मम सङ्कल्प. सिद्धिमाप्नुयात् ।

सारदामणिः । (स्वामीजि-महोदस्य मस्तकोपरि हस्त निधाय) तात ! श्रीश्रीठक्कुरस्तव मनोरथमवश्यमेव परिपूरयिष्यति ।

स्वामीजिः । (त्वरितमुत्थाय भूयश्च मातृचरणयो प्रणम्य)— मात ! तवाशीराशिर्मम परमसम्बलम्। अत परमह नि सन्दिग्धाऽस्मि यद्विजयो मेऽवश्यमेव भवेत् ।

(श्रीश्रीसारदामणि—स्तुति)

मातृमणे त्वा नमामि ।

दयस्व मयि मात. स्नेहमयि

तनयस्ते पूजनकामी ।

श्वासे च प्रश्वासे भावनाविन्यासे

मातृचरणानुगामी ॥ १३१

पुण्यविमण्डन–महृत्तरतान–पावनीं शरणं प्रयामि ।

नरेन्द्र विह्वलं मातृपदयलम्

अमलं कुरु दिनत्रियामी. ॥ १३२

॥ सप्तम-दृश्य समाप्तम् ॥

—०—

योगीनाम्वा । अहो ! नरेन्द्रनाथः समायात इति परमानन्दो मातुः श्रीसारदामणेः । वस्तुतो माताऽस्माकं भृशं कातरासीद् भक्तवर्यस्य बलरामवसुमहोदयस्य तथा च परमभक्तस्य सुरेन्द्रनाथ-मित्रस्य चिरविरहात् ।

स्वामीजिः । अहो ! बहिःस्था जना अस्माकं हृदयकातरतां तत्त्वतो बोद्धुमसमर्था इव प्रतिभान्ति मे । महन्मित्रं मम वाराणसीस्थः श्रीप्रमदादास-मित्र महोदयः । बलराम-वसु-महोदयस्य देहावसान-संवादं प्राप्य मयि भृशं क्रन्दति असौ प्राह—"किमेतत् स्वामीजि-महोदय ! संन्यासी भवान्, शोकार्तता भवति न युज्यते" ।

(सारदामणिमुद्दिश्य) किन्तु मातः ! अहं तस्मै इदं प्रत्युत्तरं दत्तवान्—

"किं चिन्त्यतेऽत्रभवता हृदयान्य-वस्तु
तुर्याश्रमे निवसता नहि विद्यते नः ?
जानीहि किन्तु मनुजान्तरतोऽप्यमीषां
क्लेशोऽधिकोऽस्ति परदुःखविलोकनेन ॥ १३०

भिन्नोऽस्तु चिन्त्यतामसौ बलराम वसु महोदयो मम गुरुभ्राता । भगवतो नाथस्य परमहंसदेवस्य श्रीचरणकमल मम समभेवाराध्य यगामः । तस्य वियोगेन निधनमेनाहं कातरो भवेयम् । अन्तरसहानुभूतिहीनं संन्यास-जीवनं न मे वाञ्छितम् ।"

सारदामणिः । तात ! सुष्ठूत्तरं दत्तं त्वया । संन्यासजीवनं ममतया समर्थापि भूतम् । स्नेहिनां संन्यासिनां ममत्वं सर्वेषु चराचरेषु तथा मनुष्येषु च सर्वोपकारि सर्वथाऽनुमोदनीयम् ।

योगीनाम्वा पुनस्तत्र ! कोऽपि व्यवस्थाऽनया विहिता श्रीरामकृष्ण मठ परिचालनार्थम्

स्वामीजिः । मातः तदर्थं भृशं प्रयत्नो मया विहितः । साम्प्रतं [illegible] प्रतिष्ठितोऽस्ति ।

सारदामणि। किन्तु वत्स नरेन्द्र त्वं तथापि परमुद्विग्न इव लक्ष्यसे ?

स्वामीजि। विश्वजननि मातः ! भवत्याः पादपद्मे निगूढ-मात्माभिलषितं निवेदयामि। मातः, प्रार्थये यावत्कालपर्यन्तं भगवतः श्रीगुरुदेवस्य सङ्कल्पं न कार्येण रूपायितं करिष्ये तावन्नाहं प्रत्यावर्तिष्ये।

(साष्टाङ्गम् प्रणिपत्य) जगदम्बिके ! आशिषो देहि, यथा मम सङ्कल्पः सिद्धिमाप्नुयात्।

सारदामणि। (स्वामीजि-महोदस्य मस्तकोपरि हस्तं निधाय) तात ! श्रीश्रीठक्कुरस्तव मनोरथमवश्यमेव परिपूरयिष्यति।

स्वामीजि। (त्वरितमुल्लम्फ्य भूयश्च मातृचरणयोः प्रणम्य)— मातः ! तवाशीराशिर्मम परमसम्बलम्। अतः परमहं निःसन्दिग्धोऽस्मि यद्विजयो मेऽवश्यमेव भवेत्।

(श्रीश्रीसारदामणि-स्तुतिः)

मातृमणे त्वां नमामि।

दयस्व मयि मातः स्नेहमयि
तनयस्ते पूजनकामी।
श्वासे च प्रश्वासे भावनाविन्यासे
मातृचरणानुगामी॥ १३१

पुण्यविमण्डन-नहवतस्थान-पावनीं शरणं प्रयामि।
नरेन्द्रः विह्वलं मातृपदवलम्
अमलं कुरु दिनत्रियामी॥ १३२

॥ सप्तम-दृश्यं समाप्तम्॥

—o—

अष्टम - दृश्यम्

[परिव्राजको विवेकानन्दः। आलोयार-महाराज-देवानजी-रामचन्द्रस्य भवने श्रीस्वामीजि-महाराजः। मूर्तिपूजाविषयकालोचनम्।

समयः—१८९१ खीष्टाब्दस्य फेब्रुयारी-मासः।

स्थानं—आलोयार-महाराजस्य देवानजी-रामचन्द्रस्य प्रासादः।]

प्रविशन्ति स्वामीजि-महाराजः, देवान-मेजर-रामचन्द्रः, स्वामि-महाराजस्य भक्तवृन्दश्च। गायति स्वामि-महाराजः]

अनन्त-करुणासिन्धुर्गोकुलविहारी।
सदाभक्तिमधुपायी मरन्दप्रसारी॥ १३३
अद्भुतसन्मिताकारो हृदयसञ्चारी।
जगद्व्यापी प्रियानन्दः प्रेमोन्मादकारी॥ १३४

हे मधुसूदन राधाभूषण वृन्दावनरसचारी
दुरन्तदुर्जन-चेतोविलसन-मुरलीनिनादकारी।
वर्धय शान्तिं मानसकान्तिं मैत्रीसौख्य-प्रचारी।
सततानन्द-पीयूषस्यन्द-विपुलपुलकप्रसारी॥ १३५

मेजर-रामचन्द्रः। आलोयार-निवासिनः सर्वे भवतां कीर्तनं श्रुत्वा आनन्दाश्रुपरिप्लुतलोचनाः श्रीश्रीवृन्दावन विहारि-स्मरणं चेतसाऽनुभवन्ति। श्रीस्वामिन्! यदि भवद्रुचौ रोचते, कीर्तन-प्रसङ्गेन मङ्गलेन कुर्वन्तु भवन्तोऽस्माकं श्रोत्रविनोदनम्।

स्वामीजिः । सङ्गीतेऽरुचिः, नहि—नहि, तत्रास्म्यहं सदारुचिः । श्रूयतां भवद्भिः ।

(सङ्गीतम्)

गैरिकवसनं धृत्वा मोहनं शंखकुण्डलं हारि ।
योगिनी-सुवेशे यामि तद्देशे
यत्र स निष्ठुर - हरिः ॥ १३६

(अहं) मथुरानगरे गृहे गृहान्तरे भ्रमिष्यामि योगसारा ।
दृष्टे प्राणबन्धौ अन्धरन्ध्रसन्धौ बध्नाम्यश्चल-द्वारा ॥ १३७
स्वीय-प्राणप्रियम् आनेष्यामि स्वयं
को वा रोधन-समर्थो रे ।
सति तु रोधके मरण-साधके
नारीवधख्यातिस्तमेतु रे ॥ १३८

(स्वामीजि-महोदयस्याश्रु निरर्गलधारं भूमौ पतति)

कश्चन भक्तः । (अन्यं भक्तमुद्दिश्य)

अहो प्रेमोन्मादना, अहो भावमाधुर्यम् ! एष महाभक्तो निश्चितमेव वृन्दावनचन्द्रं दृष्टवान् । अन्यथेदृशी भावस्फूर्तिर्नैतस्याभविष्यदिति ध्रुवम् ।

(स्वामिमहोदयः पुनरपि गायति—)

(अहं) मथुरानगरे गृहे गृहान्तरे भ्रमिष्यामि योगसारा ।
दृष्टे प्राणबन्धौ अन्धरन्ध्रसन्धौ बध्नाम्यश्चलद्वारा ॥

(रुद्धहृदयावेगेन स्वामीजिमहोदयः प्रस्तरवत् प्रतिभाति)

कश्चन भक्तः । अहो मधुमयः स्वामिमहाराजः पुण्य-भागीरथी-धारयेव निरर्गलाश्रुधारया जगत् पुनाति ।

अन्यो भक्तः । (अन्यं भक्तमुद्दिश्य) वैद्युतिकशक्तिधरोऽयं महामानवो यस्य पार्श्वान्महाप्रयत्नेनापि दूरं यातुं न समर्थोऽस्मि ।

स्वामि-महाराजः । (क्रमेण स्थैर्यमापद्य) अयमेव वृन्दावन-गोकुलप्राणधन-श्रीकृष्णः अवतारेषु सर्वप्रथममेव प्राचारयच्छ्रेष्ठ-भावादर्शद्वयम् । प्राथम्येन, विभिन्नभावमार्ग-समन्वयः ; द्वितीयतश्च, अनासक्तिः । नरक-

भौतिं स्वर्गसुखभोगमेतञ्च सर्वभीतिभोगादिकमेप एव महावतारो धर्मतो दूरेऽपसार्य प्रेम्णे प्रेम, कर्मणे कर्म, कर्तव्याय कर्तव्यम् एवंविधं श्रेष्ठजपमन्त्रं भारतभूमौ तथा च विश्वे प्रथमं संप्राचारयत्।

नमः श्रीकृष्णचन्द्राय कर्मयोगप्रचारिणे ।
अनासक्ति-विधात्रे च कर्मयोग-विघोषिणे ॥ १३९
अवतारवरायास्मै समन्वय-प्रसादिने ।
खण्डित - भारतासण्ड - मण्डलाकारकारिणे ॥ १४०
करुणा - वरुणागार - भक्तदासप्रमोदिने ।
आनन्दोल्लास-सान्द्राय प्रेमसौख्य-विधायिने ॥ १४१
मधुर-कोमलाकार - विश्वचेतोविमोहिने ।
धराकृष्ण - सुविन्यास - महाकृष्ण-स्वरूपिणे ॥ १४२
नमस्तस्मै नमो नमः ।

रामचन्द्रजी । अहो सौभाग्याद्यायाति महाराजः श्रीलश्रीमङ्गल-सिंह-महोदयः । स्वगृहमगत्यैव महाराजोऽत्रैवायातः ।

(प्रविशति धीरं महाराजः)

सत्कारोऽस्मै विधेय इति। तथाप्येनमित्थं प्रश्नयामि। (विचिन्त्य स्वामि-महोदयमुद्दिश्य)—श्रूयते किल भवान् अद्वितीयः पण्डितधुरन्धरः। ततो बहुलार्थोपार्जनसमर्थोऽसि। तत् तुच्छीकृत्य कथं सन्न्यासिवेशधर इतस्ततः परिभ्रमसि ?

स्वामि-महाराजः। भवानपि वदतु,

विहाय कार्याणि नृपोचितानि
सहाङ्गलैस्त्वं मृगयाविलासी।
अटाट्यसे किं नियतं समन्ताद्
रसेन पानाशनयोः प्रमत्तः॥ १४४

(सभासदः सर्वे चञ्चला इतस्ततोऽवलोकयन्ति)

कञ्चनान्तःपुरचारी। (उत्कण्ठामभिनयन्) अहो हतभाग्योऽयं साधुः। अचिरेणैव राजाज्ञया प्राणानमौ लप्स्यति।

महाराजः। (विचिन्त्य) कथं तत् करोमि नाहं वक्तुं समर्थो ध्रुवम्। तथापि तन्मह्यं रोचते इत्यतस्तथा करोमि।

स्वामि-महाराजः। (सहर्षम्) अहो उत्तमम्—सन्न्यासवेशेन परितो-भ्रमणं मह्यं रोचते, ततोऽहमपि तथा करोमि।

महाराजः। पुनरपि प्रष्टुकामोऽस्मि।

स्वामि-महाराजः। निश्चितं प्रष्टव्योऽस्मि। वदतु भवान्।

महाराजः। सर्वे मूर्तिपूजां कुर्वन्ति सत्यम्। किन्तु तस्यां नास्ति मे विश्वासः। तत् किं नु मे भविता।

स्वामि-महाराजः। नूनमेतन्महाराजस्य परिहासवचः।

महाराजः। नहि, स्वामिमहोदय, नहि। नाहं सर्वसाधारणवत् काष्ठ मृत्तिकापिण्डं प्रस्तरं धातवपदार्थं वा पूजयितुं समर्थः। अपि तेन परजन्मनि ममाधोगतिः स्यात् ?

भीति स्वर्गसुखभोगमेवञ्च सर्वभीतिभोगादिकमेप एव महाववारो धर्मतो दूरेऽपसार्य प्रेम्णे प्रेम, कर्मणे कर्म, कर्तव्याय कर्तव्यम् एवंविधं श्रेष्ठजपमन्त्रं भारतभूमौ तथा च विश्वे प्रथमं संप्राचारयत्।

नमः श्रीकृष्णचन्द्राय कर्मयोगप्रचारिणे ।
अनासक्ति-विधात्रे च कर्मयोग-विघोषिणे ॥ १३६
अवताखरायास्मै समन्वय-प्रसादिने ।
खण्डित - भारताखण्ड - मण्डलाकारकारिणे ॥ १४०
करुणा - वरुणागार - भक्तदासप्रमोदिने ।
आनन्दोल्लास-सान्द्राय प्रेमसौख्य-विधायिने ॥ १४१
मधुर-कोमलाकार - विश्वचेतोविमोहिने ।
धराकृष्ण - सुविन्यास - महाकृष्ण-स्वरूपिणे ॥ १४२
नमस्तस्मै नमो नमः ।

रामचन्द्रजी । अहो सौभाग्यादायाति महाराजः श्रीलश्रीमङ्गल-सिंह महोदयः । स्वगृहमगत्यैव महाराजोऽत्रैवायातः ।

(प्रविशति धीर महाराजः)

महाराजः । (स्वगतम्) दूरेऽतिष्ठमहम् । किन्तु कथनांगलभाषा-महापण्डितः सन्न्यासी आयात इति मम देवानजी-रामचन्द्र महाशय-सकाशाच्छ्रुत्वा तस्यैव गृहमागतोऽस्मि । अहो सत्यं नु—

कोटीसूर्य-समुद्दीप्त-सन्न्यासिवेश-मण्डनः ।
प्रतिभाभास्वरानन्द-महोमही-विभूषणः ॥
राजते वरसन्न्यासी ॥ १४३

(स्वामिमहोदयमुद्दिश्य सश्रद्धम्) श्रील-स्वामिमहोदयं वन्दे ।

स्वामीजिः । कल्याणमस्तु महाराजस्य ।

महाराजः । सत्यं नु मम चिरसुहृदा रामचन्द्रेणोक्तं विशेष-

सत्कारोऽस्मै विधेय इति। तथाप्येनमित्थं प्रक्ष्यामि। (विचिन्त्य स्वामि-महोदयमुद्दिश्य)—श्रूयते किल भवान् अद्वितीयः पण्डितधुरन्धरः। ततो बहुलार्थोपार्जनसमर्थोऽसि। तत् तुच्छीकृत्य कथं सन्न्यासिवेशधरः इतस्ततः परिभ्रमसि?

स्वामि-महाराजः। भवानपि वदतु,

विहाय कार्याणि नृपोचितानि
सहाङ्गलैस्त्वं मृगयाविलासी।
अटाट्यसे किं नियतं समन्ताद्
रसेन पानाशनयोः प्रमत्तः॥ १४४

(सभासदः सर्वे चञ्चलाः इतस्ततोऽवलोकयन्ति)

कञ्चनान्तःपुरचारी। (उत्कण्ठामभिनयन्) अहो हतभाग्योऽयं साधुः। अचिरेणैव राजाज्ञया प्राणानसौ त्यक्ष्यति।

महाराजः। (विचिन्त्य) कथं तत् करोमि नाहं वक्तुं समर्थो मुधा। तथापि तन्मह्यं रोचते इतस्ततस्तथा करोमि।

स्वामि-महाराजः। (सहर्षम्) अहो उत्तमम्—सन्न्यासवेशेन परितो-भ्रमणं मह्यं रोचते, ततोऽहमपि तथा करोमि।

महाराजः। पुनरपि प्रष्टुकामोऽस्मि।

स्वामि-महाराजः। निश्चितं प्रष्टव्योऽस्मि। वदतु भवान्।

महाराजः। सर्वे मूर्तिपूजां कुर्वन्ति सत्यम्। किन्तु तस्यां नास्ति मे विश्वासः। तत् किं नु मे भविता।

स्वामि-महाराजः। नूनमेतन्महाराजस्य परिहासवचः।

महाराजः। नहि, स्वामिमहोदय, नहि। नाहं सर्वसाधारणवत् काष्ठं मृत्तिकापिण्डं प्रस्तरं धातवपदार्थं वा पूजयितुं समर्थः। अपि तेन परजन्मनि ममाधोगतिः स्यात्?

स्वामि-महाराज । तत्तु विश्वाससापेक्षम्। (स्वामिमहोदयस्य भक्ता परस्पर प्रति विलोकयन्ति)।

कश्चन भक्त । (स्वगतम्) अहा श्रीकृष्णमूर्त्यादिक दृष्ट्वाऽशेषभक्ति-भावेन य साष्टाङ्ग प्रणमति, एतत्तस्यैव महासाधोरुत्तरम् ?

स्वामि-महाराज । (पुरत भित्तिगात्रोपरि लम्बमान महाराज-स्यालेख्य प्रति दृष्टि बद्ध्वा) कस्य प्रतिकृतिरेषा ?

रामचन्द्र । महाराजस्य।

स्वामि-महाराज । देवान महाराज ! कुरु स्वगृहस्थिता प्रतिकृतिमेता निष्ठीवनसिक्ताम् ।

(सर्वे भीतभीता जायन्ते)

स्वामि-महाराज । (सर्वतो दृष्ट्वा) य कोऽपि अत्रत्य क्षिपतु निष्ठीवनम् अस्य प्रतिकृतेरुपरि ।

(सर्वे वागृहीना अन्योन्यवदनान्यवलोकयन्ति)

रामचन्द्र । (किंकर्तव्यताविमूढ) स्वामि-महोदय !

आलेख्यमेतत् परमादृतस्य
　　महामहिम्नोऽस्य महीपतेर्न ।
अश्रद्दधाना इव तत् किमस्मिन्
　　निष्ठीवन हन्त वय क्षिपाम ॥ १४५

स्वामि-महाराज । किन्तु अस्यां प्रतिकृतौ न विद्यते महाराज स्वयम् । केवल कागदखण्डमेतत्, तथापि कथमस्मिन् विषये युष्माक-मेतादृशी भीति सङ्कोचो वा ।

श्रीमन्तो ननु चिन्तयन्तु हृदय प्राज्ञा यदस्मिन् पटे
भूपो न स्वयमस्ति नास्ति च पुनस्तस्यास्थि वा शोणितम्।
वार्तालाप-पराङ्मुखैर्मुखरिते यानासनाद्यक्षमे
किं भीतिर्भवतामिहातिविषमा चित्रार्पिते भूपतौ ॥ १४६

रामचन्द्र । अहो! नहि नहि, नैतत् कदाचनास्माभि कर्तुं पार्यते ।

स्वामि-महाराजः । कथम् भीतिः ? यतः अस्या प्रतिकृतौ दृश्येते महाराजस्य सादृश्यम् , पवित्रा च कायच्छाया । निष्ठीवनसिक्तायाम् अस्या स्वयं महाराज एवापवित्रीकृतः स्यात् इत्यनुमीयते युष्माभिः ।

रामचन्द्रः । (समाश्वासनशीलः) तत्र कः सन्देहः ?

स्वामि-महाराजः । (महाराजमुद्दिश्य) महाराज ! पश्यतु भवान्— यद्यपि चित्रमिदं तत्त्वतो न भवानेव, केवलं कागदमात्रं, तथापि रूपसाम्यात् चित्रेऽस्मिन् भवता रूपाकृति प्रतिबिम्बनात् एते सर्वे आलेख्यमिदं भवन्त-मिवाद्रियन्ते, सम्मानयन्ति च । ततो वस्तुतः किं नाम पार्थक्यं भवत आलेख्येन चैतेन सह ?

विज्ञायापि विभेदमस्य भवता साकं त्वदीयैर्जनैः
सश्रद्धं समयं समक्तिकमिदं चित्रं यथाऽत्तोऽस्यते ।
एवं मूर्तिसमर्चकैरपि विजानद्भिर्द्वयोर्भिन्नता
मूर्तिर्देवधिया मृदादिघटिता भक्त्या समाराध्यते ॥ १४७

भगवद्भक्ता अपि मूर्तिविशेषं भगवतः प्रतीकं मन्यन्ते । पश्यन्ति ते लीलाविशेषं भगवतो मूर्तिविशेष इति ध्रुवमेव । मूर्तिविशेषे भगवद्दर्शन-मित्येतदेव प्रकृत प्रतीकोपासनातत्त्वम् ।

धरातलेऽस्मिन् सुचिरं भ्रमित्वा
न कञ्चनाहं श्रुतवान् कदाचित् ।
"दयस्व दारो कृपणे मयी"ति
"शिले भजे त्वामि"ति वा वदन्तम् ॥ १४८

महाराज ! तद् ध्यात्वा, सत्यं जानीहि — सर्वेऽपि उपासते परब्रह्म-मेवाम् । ब्रह्म भक्त भावानुक्रमेण स्वस्वरूपं व्यनक्ति । भक्ताः प्रस्तरधातु-प्रभृतिमूर्तिं दृष्ट्वा स्मरन्ति चिन्मयेष्टदेवताम् ; तत एव भक्ता मूर्तिं पूजयन्ति ।

महाराज ! अयमेव मम दर्शनप्रकारः । अन्येषां विषये कथमहं वक्तुं शक्नुयाम् ?

मङ्गलसिंहः । महात्मन् ! मानयान श्रुत मया भवता ज्ञानगर्भं वचः ।

बद्धाञ्जलिर्विनिवेदयामि—यत्त्वदेव भवतोक्तं, तत् सर्वमेवाक्षरशः सत्यम्। एतावत्कालपर्यन्तमन्धस्य मम चक्षुरद्य उन्मीलितम्।

स्वामिमहाराज! मयि दयतां भवान्।

स्वामि-महाराजः। महाराज! परमात्मानं विना को नाम प्रसाद-दानेऽनुग्रहप्रदर्शने वा समर्थः? भगवान् परमकरुणासिन्धुः। भवांस्तमेव शरणं गच्छतु। तेनैव भवतोऽशेषं स्यात् क्षेमम्।

(स्वामिमहाराजो भगवतो महिमानं सङ्कीर्तनं कीर्तयति)

हे मधुसूदन मुरलीमोहन मञ्जु मञ्जीरधारी।
मधुपगुञ्जन-चित्तरञ्जन-मधुर-निकुञ्ज-पुञ्जचारी ॥ १४६
मथुराभरण - मोदनचरण - मरीचिमालिकाप्रसारी।
मरणशरण - मायामोहघन - मेदिनीमोचनकारी ॥ १५०
श्री-राधारमण — रङ्गिणीरङ्गण — रजोराशिविदारी।
रूपविरोचन — रुचिरलोचन — रागपीयूषसारी ॥ १५१
रासमुशोभन - रम्यविमण्डन - रुद्ररोदनसंहारी।
रसिकरञ्जन - रक्षोगञ्जन - रुचिरानन्दसञ्चारी ॥ १५२

समासदः। जयः स्वामिमहाराजस्य जयः। जयः स्वामि-महाराजस्य जयः। जयः श्रीपरमहंसदेवस्य जयः।

। अष्टम-दृश्य समाप्तम् ।

—०—

नवम - दृश्यम्

[स्थान—गुजरातस्थ-लिम्बडिपुरी ।

समयः—रात्रिः ।

लिम्बडि पुर्यां स्वामिमहाशयस्य विपद् ।

चिन्ताक्लिष्टः स्वामि महाराज लिम्बडि-नगरे साधुनिवासस्थाने उत्कण्ठितो वर्तते]

(प्रविशति अन्धकाराच्छन्नकक्षे विपन्नः स्वामि महाराजः)

स्वामिमहाराजः । अपरिचित-स्थाने साधुजनान् दृष्ट्वास्मिन् स्थाने आगच्छम् । एते साधवोऽपि मार्गनिर्दिष्ट-शालायाम् स्थातुमनुरुद्धवन्तः । किन्तु दिनद्वयेनैवाहं वीतादरोऽस्मि । कथं वा साधुस्थानेषु नारीणां यथेच्छं गमनागमने ? एतत् सर्वमशुभमिव परिलक्ष्यते । तन्मयाऽवश्यमेव स्थानमेतत्त्यक्तव्यम् ।

एष स्वधर्मः किल पापबिन्दो
र्यज्जायते नातिचिरेण सिन्धुः ।
यत्र म्रियन्ते बत साधवोऽपि
पापात्मभिः पङ्कतले निलीनाः ॥ १४३

अपि च —

कलम्बिका-शाकनिभानि मन्ये
छिन्नप्ररूढानि हि दुष्कृतानि ।
स्मृत्वेष्टनामानि ततोऽभयानि
मयाऽद्य गन्तव्यमितः सुदूरम् ॥ १४४

तदस्मात् स्थानाद् दूरतरं गच्छामि ।

(द्वारमुन्मोचयितुं भृशं यतमानोऽपि व्यर्थमनोरथो जायते स्वामिमहाराजः)

करगतो ध्रुवमस्मि दुरात्मना
गृहकपाटमिदं हि सकीलकम् ।
जननि ! किं गुरुदेवमतोच्चय
प्रथयितुं न भवेयमहं क्षम ॥
वरदे मात श्रीसारदे मयि प्रसीद ॥ १५५

अथवा भगवदिच्छा सवदा विजयतेतराम् । भगवान् परीक्षितुमिच्छति माम् । तस्मान्न मया भेतव्यम् । यथा तथा भवतु, इष्टनामैव केवल मया स्मरणीयम् ।

(तत्रोपविश्य सङ्गीतमुखेन भगवती स्तौति)

परम-करुणासनिस्त्वमसि जननि
सुधानिर्झरिणी भवाब्धितरणी ।
विश्वविपत्तारिणी विपादहरणी
रक्ष तनयाधम मा त्रिलोकीभरणी ॥ १५६

(आश्रमाध्यक्ष सहचरेण सह प्रविशति)

आश्रमाध्यक्ष । भो साधो महाराज ! अपि कुशलं भवत ? सर्वमास्ते भवत सुखकरम् ?

स्वामिमहाराज । भवतामानुकूल्येन आतिथ्यदानेन च कृतज्ञोऽस्मि । किन्तु स्थानमिदं त्यक्तुं वाञ्छाम्यचिरेण । कथं द्वारं ममास्तेऽर्गलबद्धम् ?

अध्यक्ष-सहचर । (उच्चैर्हसन्) हा हो हो ! पण्डितप्रवर साधो ! एतदपि न बुध्यसे ।

अध्यक्ष । (सहचरं तिरस्कृत्य) तूष्णीं भव । शृणु साधुमहाराज ! अस्ति भवता महत् प्रयोजनं मे । प्रार्थये भवन्तं कस्मैचनोपकाराय । वयं विपन्ना स्म ।

स्वामिमहाराज । तदर्थं कथमहं अर्गलबद्ध कृत । परोपाद्युपकार-साधनं यथासाध्यं स्वेच्छया करणीयमित्येव मे जीवनस्य मतम् । भवतां का सेवा मया करणीया ?

सहचरः । हो हो हो, भृश परापकारी साधुरयम् । कृपालु खलु भगवान् । महागुरो । अत्राद्देश्यमस्माक निश्चित सफलीमविष्यति । (उच्चैर्हसति)।

अध्यक्ष । (सहचरमुद्दिश्य) वत्स । शान्तो भव । (स्वामिमहाराजमुद्दिश्य) स्वामि-महाराज ।

निशीथिन्यामस्यामिह हि भवने कोऽपि भविता
महान् यज्ञोऽस्माकं भवति पणबन्ध पुनरयम् ।
महासाधोराजीवन-चरित-कौमार्य-नियमो
बलिर्देयस्तत् त्व भव समुचित भाजनमिह ॥ १५७

अत्र रात्रौ अस्माक यज्ञसमाप्तये भवता ब्रह्मचर्यमवश्यमेव विसर्जनीयम् । तद्विषयिणी सम्यग् व्यवस्था सुष्टुरूपेण मया कृता ।

स्वामिमहाराज । (सरोषम्) धिग् धिग् । अपि भवन्त साधव पशवो वा ? साधुभि कृते कस्मिंश्चिद् यज्ञे ब्रह्मचर्यपरिहार अमार्जनीयो ऽपराधो ध्रुवम्—वस्तुत सोऽचिन्तनीय एव। शान्त पापम् । यस्योच्चारणे पाप श्रवणेऽपि पापम् । दूरमपेहि स्थानादस्मात् । मुहूर्तेन पापपुरी मेतामहं त्यक्ष्यामि ।

(सक्रोध बहिर्गन्तुमिच्छति स्वामि महाराज । ससहचर अध्यक्षा मार्गावरोधं करोति ।)

स्वामिमहाराज । मह्य मार्ग देहि गमनाय । भो पाषण्ड । अपसर दूरम् ।

अध्यक्ष । भो साधो । मिष्टभाषणन नासि तुष्टश्चेत् शेषकया शृणु—

स्वीयेच्छया वाथ परेच्छया वा
स्वब्रह्मचर्य परिहार्यमेव ।
यद्ब्रह्मचर्य न चरन्ति केऽपि
त्वया कथ तच्चरितासि साधो ॥ १५८

तस्माच्छलेन बलेन कौशलेन वा अस्मदभिमत वय त्वयाऽवश्य परिपूरयिष्याम ।

सहचरः। हो हो हो! भोः साधो न जानास्यस्माक यज्ञ-मन्त्रम्। शृणु—

स्त्रियो देवा. स्त्रियः प्राणाः स्त्रियश्चैव विभूषणम्।
स्त्रीसङ्गिना सदा भाव्य साधुना मुक्तिकामिना॥ १५९

ॐ ह ह ख ख वज्रमध्ये ढ ढ
वज्रमणौ हुं हुम्।
चट् चटास् चट् चट् फटास् फट्॥ १६०

स्वामिमहाराजः। असहनीय पापभाषितमेतत्। ममाप्युत्तर श्रूयताम्। केनाप्युपायेन न मया सन्न्यासधर्मो ब्रह्मचर्यं वा विसर्जनीयम्।

अध्यक्षः। यदि त्व प्राणैर्विमोच्यसे, किं स्यात्?

स्वामिमहाराज.।

यद् ब्रह्मचर्य स ममास्ति धर्म.
प्राणैरल धर्म-विवर्जितस्य।
तस्मा यथेष्ट ननु हिंस यूय
न ब्रह्मचर्य तु मया विवर्ज्यम्॥ १६१

सहचर। भृश खलु साहसिकस्त्वम्? बहवः साधवस् त्वादृशा अस्माभिर्दृष्टाः।

शृणु रे साधो। अस्माकमध्यक्ष महाशयस्याशय आदेशो वा कदापि व्यर्थो भ्रष्टाक्षरो वा न भवति। यदि त्व वाञ्छसि जीवितु परि-पूरय तस्येच्छाम्।

ततो निखिले भारते सद्धर्मस्त्वया प्रचार्यते चेत्, कः कुर्यात्तवा-प्रशंसन, को वा शास्यति?

अध्यक्षः। रे निर्बोध सन्न्यासिन्!

आसाय कालं ते प्रदीयते समयो विवेचनार्थम्।
प्राणांस्त्यदयसि स त्वमित ऊर्द्ध्वमपि न यथोक्तकारी चेत्॥ १६२

(ततः ससहचरोऽध्यक्ष. द्वारमर्गलरुद्ध कृत्वा बहिर्गच्छति)

स्वामिमहाराज. । हे जननि भवतारिणि ! यदि अस्तजनहस्ते मम मरण त्वयाभीप्सित, निश्चितमेव तद् भविष्यति । किन्तु कति कति न भक्तास्त्वया पूर्वं सरक्षिता ? पारावारेऽचलशृङ्गे च; यथा कृते युगे तथा कलावपि । तदद्य विपत्तौह त्वत्कृपामेव केवल याचे ।

(विचिन्त्य सविश्वासम्)

विफला ते भवेदाशीर्न मात सारदामणे ।
नून प्रचारयिष्यामि गुरोर्मे धर्म-दर्शने ॥ १६३

(तत प्रविशति कश्चन बालक)

बालक. । (सोद्वेग) साधु महाराज ! किं सञ्जातम् ? कथ भवान् अर्गलरुद्धकक्षे राजते ?

स्वामिमहाराज. । अहो !

नीरन्ध्ररुद्धे भवने समन्तात्
प्रायस्तिरश्चामपि दुष्प्रवेशे ।
घटत बालस्य कथ प्रवेश -
स्तदेष नून प्रहितो जनन्या ॥ १६४

नून जनन्या दूतोऽय सप्रेषित ? (प्रकाशम्) बालक ! कथ त्वमिह प्रविष्टोऽसि ।

बालक. । सगोपनम् अर्गलमुन्मोच्य प्रविष्टोऽस्मि । अत्रत्या जना सर्वे तत्र सोल्लास नृत्यन्ति । नाहमस्मि तेष्वेक । भवान् झटिति वदतु— को नाम उपकारो मया करणीय ?

स्वामिमहाराज । बालक ! अपि त्व लिम्बडि राजाय सन्देश दातु समर्थो भविष्यसि ?

बालक. । निश्चितमेव । को नाम सन्देश ?

स्वामिमहाराज । स मया लिखितव्य, किन्तु कुत्र ? भवतु, मृण्मयभाजनेऽस्मिन् लिखिष्यामि अङ्गारेण (तथा करोति) ।

(मृन्मयभाजनाश बालकस्य हस्ते दत्त्वा)

त्वरित गच्छ । महाराजायैत दत्त्वा मदुद्धाराय यतस्व ।

बालकः । साधु महाराज ! निश्चितमेवाहं तत् करिष्ये । गृहमंगलवद् कृत्वा गच्छामि । यथा तेषां दारिद्र्यं नावर्तिष्यति । अचिरेणैव भवतां साहाय्यं विधास्ये ।

(बालको निर्गतः)

स्वामिमहाराजः । जननि सारदामणे ! तवैवेच्छा नितरां बलीयसी । अन्यथा क्षुद्रो बालक एव कथमस्मिन् समयेऽत्र समागच्छेत् । (गायति)

(बाहार – कौपताल)

मातुर्मे सारदामणेर्गृहीत्वा नामामृतं
प्राणवियोगो यदि स्यात् भवतु मे तत् सम्मतम् ।
शयने शिवत्वं समाहो सुरमुनिसम्मतम् ॥ १६५
कोटिगुणमणिगणनिर्जननी मे सारदामणिः
ज्ञात्वा माहात्म्यं किञ्चित् पूजयति रामकृष्णः
षोडशी कल्पिता गुरुः स पूजाप्रदानाभिमतम् ॥ १६६
(पंचम) मातृनाम मे मधनम् ।
स्थापय हृत्कमले सदा त्वं श्रीपादरत्नम् ।
पापानलोऽपि शिशु तनयं कुरु मातृसम्मतम् ॥ १६७

क्षणार्धमात्रेऽपि कृते विलम्बे
न चैष दृश्येत जनस्तु जीवन् ॥ १६८

प्रथमः प्रहरी । नहि, नहि, देशिकवर ! का वार्ता धन्यवादस्य ? किन्त्वस्माकं महाराज एतद्विषयकं किमपि न जानाति । अतः परमेतेषां सर्वेषां कठोरशास्तिं महाराजो विधास्यति ।

(राजप्रहरिणा सह सशिष्याश्रमाध्यक्षस्य प्रवेशः)

अध्यक्षः । (कृताञ्जलिः)

साधो क्षमासार चरित्रपूत
विद्वेष-दृष्ट्या न विलोकयास्मान् ।
प्राणैर्यथास्मान न राजा वियुञ्ज्यात्
कर्तुं तथा त्वं भव सानुकम्पः ॥ १६९

स्वामि-महोदयः । महाराजो यथा इच्छते तथा विधास्ये ।

। समाप्तं नवम-दृश्यम् ।

—०—

बालक । साधु महाराज । निश्चितमेवाह तत् करिष्ये । गृहमर्गलबद्ध कृत्वा गच्छामि । यथा तेषां दृष्टिरत्र नापतिष्यति । अचिरेणैव भवता साहायक विधास्ये ।

(बालको निगत)

स्वामिमहाराज । जननि सारदामणे । तवैवेच्छा नितरां बलीयसी । अन्यथा क्षुद्रो बालक एप कथमस्मिन् समयेऽत्र समागच्छेत् । (गायति)

(बाहार – झाँपताल)

मातुर्मे सारदामणेर्गृहीत्वा नामामल
प्राणवियोगो यदि स्यात् भवतु मे तत् सबलम् ।
शवत्वे शिवत्व ममाहो सुख सुनिर्मलम् ॥ १६५
कोटिगुणमणिखनिर्जननी मे सारदामणि
ज्ञात्वा माहात्म्य किञ्चित् पूजयति यामविकल
षोडशीं कालिका गुर स पूजाक्षदानामलम् ॥ १६६
(कवल) मातृनाम मे सबलम् ।
स्थापय हृत्कमले मम तव श्रीपादकमलम् ।
वाराणसीफल किमु तनय कुरु मातृबलम् ॥ १६७

(तत प्रविशति लिम्बडि राजस्य प्रहरिद्वयम्)

प्रथम प्रहरी । स्वामि महाराज । भवानागच्छतु अस्माभि सह । अहो दु साहसिकत्वम् अनल्पसाधूनाम् ।

(द्वितीय प्रहरिणमुद्दिश्य)

गच्छ बन्धो । अध्यक्षमत्राह्वय, यथा न स पलायनतत्परो भवतु । तस्य सहचराश्च सर्वे आगच्छेयु । प्रादघोषय—सर्वे त राजाज्ञया विचारणीया, कथञ्चन न स्थानान्तर गच्छेयुरिति ।

(द्वितीय प्रहरी बहिर्गच्छति)

स्वामि-महाराज ।

गाढ कृतज्ञो भृशमस्मि भद्रा
युनज्मि युष्मानपि साधुवादै ।

क्षणार्धमात्रेऽपि कृते विलम्बे
न चैप दृश्येत जनस्तु जीवन् ॥ १६८

प्रथमः प्रहरी । नहि, नहि, देशिकवर! का वार्ता धन्यवादस्य? किन्त्वस्माकं महाराज एतद्विषयकं किमपि न जानाति । अतः परमेतेषां सर्वेषां कठोरशास्ति महाराजो विधास्यति ।

(राजप्रहरिणा सह सशिष्याश्रमाध्यक्षस्य प्रवेशः)

अध्यक्षः । (कृताञ्जलिः)

साधो क्षमासार चरित्रपूत
विद्वेष-दृष्ट्या न विलोकयास्मान् ।
प्राणैर्यथास्मान् न राजा वियुञ्ज्यात्
कर्तुं तथा त्वं भव सानुकम्पः ॥ १६९

स्वामि-महोदयः । महाराजो यथा दयते तथा विधास्ये ।

॥ समाप्तं नवम-दृश्यम् ॥

—०—

दशम - दृश्यम्

[स्थान— श्रीरामेश्वरे कन्याकुमारिका-मन्दिरादूरवर्ति
विवेकानन्द प्रस्तरराशि ।
समय — पूर्वाह्न ।
स्वामि-महोदयस्य स्वसकल्पविवृति-।]

(प्रविशति स्वामिमहाराज)

स्वामि-महोदय ।

पद्भ्यामटन् निखिलदशमुपागतोऽस्मि
प्रान्तेऽद्य दक्षिणतमे वत भारतस्य ।
रत्नाकरेण परित परिवेष्ट्यमान
तीर्थोत्तम यमिह सन्त उदाहरन्ति ॥ १७०

अहो स्थाने खलु रामेश्वर साधवो दक्षिणभारतीय-वाराणसीत्याहु ।

अत्रत्य-मन्दिरमनुत्तममत्र वर्ये
माहात्म्यतश्च महता वपुषा च मन्ये ।
शिल्पक्रिया चरमकौशलसारभूतै
सवेष्टित यदभितो रुचिरैरलिन्दै ॥ १७१

कन्याकुमारीति मनोज्ञ-नाम्ना
मनोज्ञमूर्त्येह विभाति माता ।
उद्गच्छता बाष्पभरेण कुण्ठो
'मामे ति मे व्याहरतोऽन्त कण्ठ ॥ १७२

स्थानेऽत्रागमन ममासीत् परमाकाङ्क्षितम् , तथास्मिन् मन्दिरे पूजादानम् ।

सर्वं तत् सत्कृत्यं यथायथमनुष्ठितम् ।

मन्दिरान्नातिदूरे प्रस्तरमये भारतवर्षस्य भूखण्डेऽस्मिन् समागत्य मनसि मे महान् भावकोलाहल उद्रिक्त आस्ते ।

पश्चान्मम राजते—महादेशमदशी अतुल-विभूतिमयी देशजननी भारत-भूमिरेकदा सर्वधर्म-दर्शन-विज्ञान-कलादि-ज्ञानसारा । पुरतो ममोत्तुङ्ग-वीचिमाली निरन्तरार्तनादमुखरो भारतसागरः । ऊर्ध्वे दिग्दिगन्त प्रसारितं नीलं नभः । भगवान् मरीचिमाली चोर्ध्वं प्रसरन् संप्रेरयति स्वीय-गौरव-कणान् किरणान् अपरिमेयान् । अन्तर्ज्वालं ज्वलतीव सागरवक्षः । अपि तद्भारतवर्षस्य दुःखदैन्यहेतोः ?

अशान्तः सागरः प्रोक्त इति युक्त्या न युज्यते ।
रत्नाकरो महाचित्तः शान्तो दान्तः सदा भवेत् ॥ १७३
मर्यादा शाश्वती सिन्धौ गतः सीमनि बन्धनात् ।
पूर्णताचिह्नमात्रं नु तरङ्ग-भङ्ग-रङ्गणम् ॥ १७४
क्रोडलोलोर्मिमालायाः पारावारः परायणम् ।
महारुद्रो महाशान्तो रसोद्वेलो महाविभुः ॥ १७५

अहो कोमल-मधुरं गायन् समुद्रपथेन याति कोऽयं जनः स्वतरण्या-मारूढः । मत्स्यजीवी कश्चनेति निश्चितम् ।

(कश्चन मत्स्यजीवी गायन् प्रविशति)

मम भव–नाविक रे !
अकूले सागरे झञ्झाक्षोभपरे
　　रक्ष तरणीं मम कृपाल रे ॥ १७६
क्षुद्रा मे तरणी सहस्र-सयोजनी
　　वर्ततेऽनाहता पारावारे ।
मुहुर्दोदुल्यते, सद्यः प्राणघाते
　　कुरु दयासिन्धो करुणां मयि रे ॥ १७७
अन्नवस्त्रहारा मङ्गलध्यानपरा
　　गृहिणी रोदनसारा गृहाभ्यन्तरे ।

भवसमुद्रतटे कृष्णकृष्णमेघजूटे
तनयोऽपेक्षते व्यथितोऽन्तरे ॥ १७८
क्वासि त्व स्वामिन्। धरित्रीरक्षणकामिन्
दीनान्तर्यामिन् दु खपारावारे।
धारय त्व सर्वं चेपर्णी गुणादिक
वक्षसि रक्ष मा पुण्यसारात्सारे॥ १७९

(सङ्गीत श्रुत्वा भृश चिन्तातुर स्वामिमहाराज सुचिर ध्यायति)

स्वामीजि । अहो करुण गायत्यय मत्स्यजीवी । एव शत सहस्र निरन्न दीन-भारतवासिन अश्रूणि नि सार्य कठोरतम-दारिद्र्य-सपीडिता बुभुक्षा-मूर्छितान् सन्तानानन्नहीनान् मृत्युमुखपतितानपि रक्षितुमसमर्था रोरुयन्ते ।

अन्यतस्तु—प्रबलविलासोन्मत्ता क्षमतामदगर्विता धनिना निर्धनान् निष्पिष्य स्वविलास-तृष्णा परितर्पयन्ति । शिक्षादीक्षाहीना अन्त्यजा पुरोहित सम्प्रदायस्य निष्ठुर-व्यवहार-दीर्णा सनातन धर्मं प्रति जाता वीतश्रद्धा । हिन्दुधर्ममनादृत्य बहवो जना कुर्वन्ति च धर्मान्तर ग्रहणम् । उच्चशिक्षाभिमानिन स्वार्थान्धा ग्रामवासिन स्वजनानपि परित्यज्य पत्नीमात्रसारा अभारतीय-जीवनानि यापयन्त अधीरमाकुल निर्ममतम कालमतिवाहयन्ति । इत्थमेव त हिन्दुधर्मपूतशिरसि अभिशापाग्निगोलिका क्षिपन्ति । तत्फलेन च—

निरर्थानुष्ठान विदधति जना धर्मविधया
क्रमाल्लुप्तो दशादधिगतफलो वैदिकविधि ।
कुसस्काराच्छन्न विकृतचरित भारतमभूत्
तदेतद् धर्मीय वहति किल कङ्कालमधुना ॥ १८०

(प्रविशति कश्चनास्थिकङ्कालसारा धीवर बालक)

धीवर-बालक । अहो ध्यानरत एष सन्न्यासी अहङ्ज्ञानाहारक्लिष्टो मुमूर्षुरिव जात । तथापि मातापितरौ मम सर्वदा वदत ध्यानमग्नाना ध्यान

भङ्गः कदापि न करणीय इति। नाहं कदाचन सन्न्यासिजनस्य ध्यानभङ्गे प्रवर्तेयम्। तथापि मर्मच्छेदी प्राणभेदी दैन्यहाहाकारो मां करोति ध्यानभग्न-सन्न्यासिनोऽपि भिक्षातत्परम्। (स्वामिमहोदयस्यान्तिकं गत्वा ध्यानभङ्गं मत्वा) देव सन्न्यासिमहाराज! यदि किञ्चित्तवास्ते भोज्यद्रव्यं, तर्हि मह्यं कृपया ददातु भवान्।

स्वामिमहाराजः। अस्मिन् जननिरले स्थाने केनोपायेन त्वम् आगतोऽसि, कथं वा?

धीवर-बालकः। देव! अहं कश्चन धीवरबालकः समुद्रेण सह क्रीडन्निव जीवामि। ततो यदा मम पिता नौयानेन दूरसमुद्रं प्रति प्रस्थितः, तदाऽहं सन्तरणक्रमेण समुद्रसैकतात् स्थानेऽस्मिन् समागतः।

स्वामिमहाराजः। तद्भवतु, क्षुत्पीडितस्त्वं प्राथम्येन प्रसादशेषं देवस्य भक्षय।

धीवर-बालकः। देव मह्यं तद्ददातु भवान्। मातृसकाशे तदुपस्थाप्य यथासमयं तदन्नदैवतं सेविष्ये।

स्वामीजिः। यथासमयमिति किम्?

धीवर-बालकः। माता मे कदापि न पितुरग्रेऽन्नं ग्रहीष्यति। यदि मातापितरौ बुभुक्षितौ, कथमहमन्नं ग्रहीष्यामि?

स्वामिमहाराजः। एष एव नियमः?

धीवर-बालकः।

एष मे परिवारस्य नियमो हि सनातनः।
पितरौ देवताश्रेष्ठौ प्रसाद प्राप्नुया तयोः॥ १८१

स्वामिमहाराजः। पिता तवोपार्जनक्षमश्चेत् कथं तव परिवारस्य दैन्यं भवत्?

धीवर-बालकः। देव महाराज!

कृत्वाऽपि तातः श्रममन्तहीनं
न ग्रामग्रासोऽर्जयितुं समर्थः।

यतो हि नौभाटकवृद्धिशुल्कै—
रुपार्जितोऽर्थो व्ययितोऽस्ति सर्वं ॥ १८२

माता तु मे कदापि स्वीयामनाहारवार्ता पित्रे मम लेशतोऽपि न ज्ञापयति। किमहं करोमि। तस्माद्दरिद्र परिवार दुःखनिवारणार्थमेवाहं बहिरागतोऽस्मि।

स्वामिमहाराज। कियत्कालात् पूर्वं किमु तव पितैवास्यां दिशि गतवान्।

धीवर-बालक। अथकिम्?

स्वामिमहाराज। ततस्त्वं पुनः सन्तरिष्यसि कूलं प्रति बुभुक्षुरपि?

धीवर-बालक। अथकिम्?

स्वामिमहाराज। (स्नेहं प्रकटय्य) नहि, नहि, ममैव नौयानेन त्वं गच्छ। नौवाहका न त्वामर्थं याचिष्यन्ते। मुद्रा स्वल्पा अस्मत्तो गृहाण (इति दातुमुद्यत)।

धीवर-बालक। नहि, नहि स्वामिवर।

न हि मुद्रा ग्रहीतव्या मया सन्न्यासिनो जनात्।
किञ्च मातुर्विनादेशं करिष्ये न कदापि तत् ॥ १८३

केवलं क्षुत्पीडिता मम माता ददह्यत इति हेतोः भिक्षां प्रार्थये।

स्वामिमहाराज। भो नौवाहका! यूयं बालकमेतं तीरे स्थापयित्वा पुनरनागच्छत। (बालको बहिर्गतः)

अहो! ईदृशानि कति कति न पुण्यचित्राण्यखण्ड-सत्यव्यञ्जकानि मम दृष्टिपथं समागतानि? मम भारतवर्ष! सभ्यताकृषि सर्वोच्च शृङ्गारूढस्य तवात्र कथमीदृशी दशा?

(पुनर्ध्यायन्)

अहो! लक्ष-लक्ष-सन्न्यासिनो वयं भारतवर्षस्य कठोर-श्रमलब्धान्न-पुष्टा देशवासिनां हितार्थं किं कुर्मः? अपि वयं दर्शन शास्त्रजटिल-तथ्यमात्रोद्गरण-परा एतान् न वञ्चयाम?

श्रीगुरुदेवो मामकथयत्—शून्योदरे धर्मो न शोभते। स्थूल तण्डुल-

वस्त्राणां प्रयोजनमनिवार्यमेव। शून्योदरेभ्यो धर्मोपदेशदानं निरर्थकमिति। अथवा धर्मप्राणा भारतवर्षीयाः सर्वे एव। गृहे गृहे, कानने, प्रान्तरे, पथि सर्वत्र प्रस्फुरति भारतीयानां धर्म्मक्रियाकलापः। अत्र भारतीयानाम् अवश्यप्रयोजनं शिक्षायाः प्रसारस्य, अन्नवस्त्र-संस्थानस्य च। किन्तु निष्कपर्दक संन्यासी त्वहं कथं तत् कुर्याम् ? अत्र प्रथमं प्रयोजनं सत्यपरायण-श्रमकुशल-मानवानां द्वितीयञ्च अर्थस्य। (पुनरपि ध्यानमौनं)।

(सहसा उच्चैः) श्रीश्रीगुरुदेवस्य आशीर्वादे कार्यभारमिममहं ग्रहीष्ये। भगवता गुरुदेवस्यैवेच्छया अदूर-भविष्यति भारतस्य प्रतिनगरं प्रतिग्रामं तथाविधा नरा नार्यश्च सहस्रशो जन्म लप्स्यन्ते, ये गतानुगतिकतया न भविष्यन्ति स्वार्थपरायणाः, न वा धाविष्यन्ति भोगलालसामभिलक्ष्य, परन्तु नरनारायण-सेवायै सर्वस्वं समर्प्य महायुगचक्र-विवर्तन-सहायका भविष्यन्ति।

किन्तु कुतोऽर्थो मिलिष्यति ? चिन्ताभारमिमं मस्तिष्के विधृत्य हृदय-शोणितमोक्षणेन पर्यभ्रमं भारतमखिलम्। धनिनो राज-महाराजा मया समार्थिता सहायतादानाय। किन्तु केवलं मौखिकी सहानुभूतिरेव मया लब्धा।

यदि स्यात् केवलं भारतवर्षस्य मुखापेक्षी, निरर्थकं समयो मे यास्यति। विस्तीर्णनीलसागरराशिं समुत्तीर्य यास्याम्यहं भारतीयानां पक्षतः पाश्चात्य-देशमेतेषां कृते सहायताभिक्षार्थम्।

यदि विजयो मां वृणुयादर्थे मह स्वदेशं प्रत्यागमिष्याम्यन्यथा मरणं मम भवतु प्रयत्नावसरेऽस्मिन्, का क्षतिः ?

हे देव! देहि मे शक्तिं दुर्जयाम्, अवश्यमेवाहं विजयी भवेयम्।

धारिणि जननि एहि।
उत्तालसागरे तिरोभूतपारे तारणतरणि एहि।
मरुभूमिप्रान्ते तृष्णातिश्रान्ते रसनिर्झरिणि एहि॥ १८४
कण्टकित-कानने विमार्गविचरणे शिखामालिनि एहि।
रुद्धकारागारे वद्धकायसारे पवनवाहिनि एहि।
पालिनि जननि एहि॥ १८५

॥ समाप्तं दशम-दृश्यम् ॥

—o—

एकादश - दृश्यम्

[स्थानं—माद्राजनगरे श्रीमन्मथनाथ भट्टाचार्य-महोदयस्य गृहम् ।

समयः—पूर्वाह्णः ।

प्राप्त-मातृनिर्देशस्य स्वामिमहाराजस्यानन्दातिशय्यम्]

(प्रविशति श्रीस्वामिमहाराजः)

स्वामि-महाराजः । अहो अपूर्व-सुन्दरं सौरकरोज्ज्वलं प्रभातम् । सूर्यदेवः सहस्रकर-विस्तारेण दुहितरं धरित्रीं आशीर्भिरभिनन्दयति । ततः—

प्रतिसरः कमलानि सहस्रशो
विकसितानि भवन्ति दिनोदये ।
प्रतितरूच्चरते रुचिरं रुतं
पिक-शुकादि-विहङ्गम-सन्ततिः ॥ १८६

अपि च —

क्षेत्रे क्षेत्रे श्यामलाः शस्यमाला
दोलायन्ते मन्दवायु-प्रसङ्गात् ।
नद्यां नद्यां चञ्चला ऊर्मिलेखा
अभ्यस्यन्तीवोत्प्लुतैर्लाघवत्वम् ॥ १८७

स्मरामि प्रातरद्य मुहुर्मुहुर्ममानन्दमयीं करुणामयीं सेवामयीं जननीम् ।

सा साम्प्रतं तिष्ठति मातृमन्दिरे
गोलापमात्रादि-सखी-सुसेविता ।
स्वज्योतिषोद्दीपितदिग्दिगन्तरा
विस्तारिपादा च विसारिकुन्तला ॥ १८८

तस्याः प्रसन्नाननारुण किरणैः सहस्रभक्तानां हृत्कमलानि विकचीभवन्ति, तेषां नीरव मनोवीणा नियतं निनदन्ति जननी-मिष्टमधुरवाणी-स्वरलयतानैः, शून्य-जीवन-पात्राणि च तेषां जातानि पूर्णानि तस्याः स्नेहामृतेन ।

अहो ! तस्या अरुण-चरण-रेणुकणाभिः पवित्रीभवितुं मम मनो भृश-मुत्कण्ठते ।

जननी सारदामणिः ।
कल्मषनाशिनी विश्वद्योतिनी
सुतस्नेह-हीरकखनिः ॥ १८६
मातुरादेशे सति दूरदेशे
प्रयास्यामि विपदध्वनि ।
तोयनिधिपारे ज्ञानप्रसारे
चित्त प्रधावति जननि ।
देवमार्गानुसारिणि ॥ १६०

(द्वारे कराघातः)

भक्ताः । (नेपथ्ये) स्वामि-महोदय ! वयमन्तः प्रवेष्टुकामाः स्मः ।

स्वामि-महाराजः । वाढम् । अन्तरागच्छत ।

(भक्ताः प्रविशन्ति)

सर्वे । स्वामिमहोदयं प्रणमामः ।

स्वामि-महाराजः । सर्वेषां कल्याणं भूयात् ।

प्रथमो भक्तः । स्वामिमहोदय ! भवत आमेरिका-धर्म-महा-सम्मेलने योगदानार्थं प्रणामनिवेदनार्हमर्थं संगृहीतवन्तो वयम् । भवान् कृपया गृह्णातु ।

स्वामि-महाराजः । इतोमध्य एवार्थः सगृहीतो युष्माभिः ? सत्यं नु सर्वे यूयं श्रमकुशलाः कर्मनिपुणाश्च ।

जानीत किन्तु, प्रेमसदृशं किमपि नास्ति जगति ।

प्रेमा लोकार्हं ह्यत्यद्रिश्रृङ्गं
घोरारण्यं घोर-घोरं मरुञ्च ।
लब्ध्वा युष्मत्प्रेम भक्त्या विशुद्धं
धन्यम्मन्यः साम्प्रत चाहमस्मि ॥ १६१

प्रेमाऽयमक्षयोऽस्तु गुरौ परमहंसे श्रीमताम् ।
भगवति परमात्मनि च स्वदेशमातरि चातिमात्रम् ॥ १६२

द्वितीयो भक्त । स्वामि महोदय ! वयमेव धन्या, न भवान् । अस्माक सौभाग्य भवादृश-गुरुवरलाभेन । शतसहस्रजन्म पुण्यफलेन वय भवादृश गुरु लब्धवन्त । अहो ! का वत जगति गुरुदेवसदृशो जन ?

तुहिन-शैल-महामहिमोन्नत
सुरधुनी-सलिलामल-मानस ।
अतलसिन्धुगभीर-बहुश्रुत
क्षितिरिवातितरा सहनोत्तर ॥ १६३

स्वामि-महाराज । भक्तवर ! परम-शोभन खलु ते वच । किन्तु को नाम स गुरु । गुरुरकोऽस्माक महागुरु श्रीपरमहसदेव । त वन्दध्वम् ।

सर्वे । (श्रीश्रीरामकृष्ण स्तुति)

जय प्रभो जय दुरितभयमय-निखिलवेदमय-सुधास्रुते
जयाम्बिके जय शिवभाष्योम्बय-दयाजितहृदय-भक्तवृते ।
स्मरत गुरुनाम विश्वगुणधाम-कृष्णयुतराम-कृपाकृते
जय मातर्जय वसुधाविस्मय-माङ्गल्यनिलय-सुतादृते ॥ १६४

तृतीयो भक्त । स्वामि-महोदय ! पूर्वमस्माभि सगृहीत पञ्च शतमुद्रामितोऽर्थो भवदाज्ञानुसारेण दरिद्रेभ्यो दत्त । साम्प्रत जन साधारण्याद अस्माभि कियाश्चनार्थ सगृहीत । मकृप त गृहीत्वाऽस्माननुगृह्णातु भवान् ।

स्वामि-महाराज । अहो जनसाधारण्यस्यार्थ ! एतत्तु दान देश मातृकाया एव, तत स्वशिरसि ससम्भ्रम धारयामि (तथा करोति) । किन्तु वत्सगण ! एषोऽर्थो युष्माभिरेव सरक्षितव्य । यथासमय प्रयोजनक्रमेणाहम् अर्थमेत ग्रहीष्यामि ।

सर्वे। यथादेशो भवतां तथाऽस्तु। प्रणामाञ्जलि-ग्रहणेनानुगृह्णातु नो भवान्।

स्वामि-महाराजः। (चिन्तापर्या ः) सत्यमेव यास्यामि नु 'चिकागो' धर्ममहासम्मेलनं हिन्दुप्रतिनिधिरूपेण किन्तु कोऽहमत्र स्वेच्छानुसारेण चलनाय

रथोऽहं गुरुदेवस्य चलामि तेन चालितः।
वीणाहं केवलं तस्य स्वेच्छया तेन वादितः॥ १६५
अहं क्रीडनकं तस्य भवामि तेन खेलितः।
यन्त्रमस्मि करे तस्य भ्रमामि तेन घूर्णितः॥ १६६

अहो अपारा गुरुदेवस्य करुणा, अपूर्वो मधुरश्च स्वप्नः। तथाहि—

उत्ताले तोयधेस्तोये देवः संचरति स्वयम्।
सङ्केतेन समादिश्य तस्यानुगमनाय माम्॥ १६७

तथापि—

स्वप्नार्थं नु ग्रहीष्यामि मातुर्निदेशनाद् ध्रुवम्।
कोटिशोऽभ्यधिका माता पितुर्भारतशासनम्॥ १६८
गुरोराशीर्वचः काम्य ततोऽपि मातुरीप्सितम्।
माता श्रेष्ठं तपो नृणा साधन भजन शिवम्॥ १६६
माता ध्यान तथा ज्ञानं माता सर्वं परात् परम्।
निखिलाश्रयण माता जनने मरणे हितम्॥ २००

ततोऽहं नितरां मातुरादेशं प्रतीक्षे। अहो अतुलनीया माता—

एकपार्श्वे तुलायाः स्युश्चतुर्दश अगन्ति चेत्।
पार्श्वान्तरे प्रसादस्य जनन्या राजते कणा॥
अणुमात्रा भवेत् सा वा भारि किं नु तयोर्भवेत्? २०१
हास्यरेखा जनन्याश्च पारिजातेन तुल्यते।
नन्दन-वनजातेन चेत् किं चारुतरं भवेत्? २०२
पिकरुते वसन्तस्य मातृकण्ठामृते तथा।
सुतस्य कर्णमायाते किं नु सुखतरं भवेत्? २०३

एकतो जाह्नवीवारि स्पर्शेन मातुरन्यत ।
सुतेन लभ्यते भाग्यात् किं नु शीततरं भवेत् ? २०४

ततो मातुः सारदामणेः सकाशे विदेशयात्रायै अनुमतिं सम्प्राप्य पत्रमेकं लिखितं मया। अहो सुप्रसन्ना चेद् भवेन्माताऽचिरादायात्तस्या अनुशासनम्।

भृत्य । (प्रविश्य) देव एतदायातम्

स्वामि-महाराज । (स्वगतम्) नूनं प्राप्स्याम्येव मातुरादेशम्। (प्रकाशं) अये! किमायातम्?

भृत्य । पूज्यपाद स्वामिमहोदय! आयातं पत्रमिदं भवतः।

(पत्रं दत्त्वा प्रस्थितः)

स्वामि-महाराज । (त्वरितं पठति)

"स्वस्ति। तात नरेन्द्र! पत्रं तव मयासादितम्। भगवतः श्रीश्रीगुरुदेवस्य पवित्रं नाम स्मारं स्मारम् आमेरिकाभिमुखमग्रेसरीभव। कल्याणं त्वां वरिष्यत्यनिवार्यम्।

स्नेह-चन्दनसिक्त देवदुर्लभ शिवपुत्र ममाञ्चलनिधे! मातुराशीर्वादास्त्वां सर्वत्र कवचीभूय रक्षन्तु, ददतु च विजयमपरिमितमतुलनीयम्।

विदेशे विलायते सर्वदा सावधानेन त्वया भवितव्यम्। कल्याणाचरं मार्गं नित्यमनुसर। पितरं स्मर मातरञ्च। सर्वहृदयेनाशीर्वादांस्त्वां विज्ञापयामि। अलमतिविस्तरेण।

शुभाशीर्वादिका—तव माता।"

(करताल-पूर्वकम्)

जय मातः सारदामणे जय।
जय गुरुदेव जय ॥

अहो नु मातुः कृपा। तन्न्या आशीर्वादेनानायासेन सागरपारं गमिष्याम्यहम्, जेष्यामि च विश्वं समग्रम्। अतः परं नास्ति मनसि मे द्विधा काचन भीतिर्निराशा वा। साम्प्रतं सर्वकर्मक्षमोऽहम्।

जय श्रीमातुर्जय ।
जयश्च गुरुदेवस्य मे ॥

प्रतिज्ञा ममावश्यं संपालयिष्यामि । दूरदूरान्तरेषु प्रचारयिष्याम्यहं कल्याणधाम्नो गुरुदेवस्य धर्मं भारतमातुश्च शाश्वत साम्य मैत्री-शान्ति-प्रीतिवाणीम् ।

अद्य प्रभृति प्राच्य-पाश्चात्त्ययोः करसंमर्दनं भविष्यति । प्राच्यदर्शनं मेलिष्यति पाश्चात्त्य-विज्ञानेन सह । उत्पत्स्यते जगति नवं महामेलनक्षेत्रमननुमितपूर्वम् । नवामेरिकाभुवा सहाद्य पुरातन-भारतवर्षस्य नवसांस्कृतिकमेलनं भविष्यति परमसुन्दरम् । मातुः परमकृपया तत्र प्रथमोपायोऽहं तस्याः सन्तानः ।

अहो नु सौभाग्यं मम ।
जयो मातुर्मे जयः
जयो गुरुदेवस्य जयः
जयो देशमातुश्च जयः ॥

(देशजननीसकाशे प्रार्थनम्)

पुण्यश्रीके भारत-जननि ।
सुदूरे विदेशे दीनहीन-वेशे
दयस्व सुते शिवप्रसविनि ॥ २०५
कृपामयि वसुधामोहिनि
ज्ञान-भक्ति-प्रेम- सेवा-प्रीति-हेम-
करण्डधारिणि पुण्यसालिनि ॥ २०६
ज्ञानादि-पञ्चपुष्पाणि चारूणि मातृकार्चने ।
पाश्चात्त्य-गलशोभीनि हितानि विश्वपूजने ॥ २०७

। समाप्तमेकादशदृश्यम् ।

—०—

एकतो जाह्नवीवारि स्पर्शनं मातुरन्यत. ।
सुतेन लभ्यते भाग्यात् किं नु शीततरं भवेत् ? २०४

ततो मातुः सारदामणेः सकाशे विदेशयात्रायै अनुमतिं सम्प्रार्थ्य पत्रमेकं लिखितं मया। अहो सुप्रसन्ना चेद् भवेन्माताऽचिरादायास्यत्या अनुशासनम्।

भृत्यः। (प्रविश्य) देव एतदायातम्

स्वामि-महाराज.। (स्वगतम्) नूनं प्राप्स्याम्येव मातुरादेशम्। (प्रकाशं) अये! किमायातम्?

भृत्यः। पूज्यपाद स्वामिमहोदय! आयातं पत्रमिदं भवतः।

(पत्रं दत्त्वा प्रस्थितः)

स्वामि-महाराज.। (त्वरितं पठति)

"स्वस्ति! तात नरेन्द्र! पत्रं तव मयासादितम्। भगवतः श्रीश्रीगुरुदेवस्य पवित्रं नाम स्मारं स्मारम् आमेरिकाभिमुखमग्रेसरीभव। कल्याणं त्वां वरिष्यत्यनिवार्यम्।

स्नेह-चन्दनसिक्त देवदुर्लभ शिवपुत्र ममाञ्चलनिधे। मातुराशीर्वादास्त्वां सर्वत्र कवचीभूय रक्षन्तु, ददतु च विजयमपरिमितमतुलनीयम्।

विदेशे विलायते सर्वदा सावधानेन त्वया भवितव्यम्। कल्याणोत्तरं मार्गं नित्यमनुसर। पितरं स्मर मातरञ्च। सर्वहृदयेनाशीर्वादांस्त्वां विज्ञापयामि। अलमतिविस्तरेण।

शुभाशीर्वादिका—तव माता।"

(करताल-पूर्वकम्)

जय मातः सारदामणे जय।
जय गुरुदेव जय ॥

अहो नु मातुः कृपा। जनन्या आशीर्वादेनानायासेन सागरपारं गमिष्याम्यहम्, जेष्यामि च विश्वं समग्रम्। अतः परं नास्ति मनसि मे द्विधा काचन भीतिर्निराशा वा। साम्प्रतं सर्वकर्मक्षमोऽहम्।

जयः श्रीमातुर्जयः।
जयश्च गुरुदेवस्य मे ॥

प्रतिज्ञा ममावश्यं संपालयिष्यामि। दूरदूरान्तरेषु प्रचारयिष्याम्यहं कल्याण-धाम्नो गुरुदेवस्य धर्मं भारतमातुश्च शाश्वत साम्य-मैत्री-शान्ति प्रीतिनाणीम्।

अद्य प्रभृति प्राच्य-पाश्चात्त्ययोः करसंमर्दनं भविष्यति। प्राच्यदर्शनं मेलिष्यति पाश्चात्त्य-विज्ञानेन सह। तत्पत्सने जगति नवं महामेलनक्षेत्र-मननुमितपूर्वम्। नवामेरिकाभुवा महान् पुरातन-भारतवर्षस्य नवसांस्कृतिक-मेलनं भविष्यति परमसुन्दरम्। मातुः परमकृपया तत्र प्रथमोपायोऽहं तस्याः सन्तानः।

अहो नु सौभाग्यं मम।
जयो मातुर्मे जयः
जयो गुरुदेवस्य जयः
जयो देशमातुश्च जयः॥

(देशजननीसकाशे प्रार्थनम्)

पुण्यश्रीके भारत-जननि।
सुदूरे विदेशे दीनहीन-वेशे
दयस्व सुते शिवप्रसविनि॥ २०५
कृपामयि वसुधामोहिनि
ज्ञान-भक्ति-प्रेम- सेवा-प्रीति-हेम-
करण्डधारिणि पुण्यमालिनि॥ २०६
ज्ञानादि-पञ्चपुष्पाणि चारूणि मातृकार्चने।
पाश्चात्त्य-गलशोभीनि हितानि विश्वपूजने॥ २०७

॥ समाप्तमेकादशदृश्यम् ॥

—०—

द्वादश - दृश्यम्

[खेतडि-महाराजस्यानुरोधेन विवेकानन्द नामग्रहणपूर्वक
स्वामिमहाराजस्यामेरिका-गमनम्।
स्थान—जयपुरनगरी।
समय—१८९३ खीष्टाब्द, सन्ध्या।
खेतडि-महाराज, नर्तकी, महाराजस्य बन्धवश्च।]

खेतडि-महाराज। बन्धवो राजपुतना निवासिनो राजान! परम सौभाग्यमेतद्यद् भवन्तो मम पुत्रस्य जन्मोत्सवे तस्मै आशीर्दानायात्र समागता।

माहात्म्यमुत्सवस्याहो प्रियैः सह समागमात्।
उत्सवो नास्ति पूजा स्याद् गुरूणां पादपूजनात्॥ २०८

तद् बन्धव, नाय केवलमुत्सवो मत्कृते पूजादिवसश्च। यतो मम गुरुदेव स्वय सुदूर मद्र प्रदेशात् स्वीय सर्व-गुरुकर्माणि परित्यज्य स्थानेऽस्मिन् समायात।

प्रथमो राजा। महाराज! सत्यमेव भवता गुरुदेव परम-सदय ऊर्जस्वी च। महामोहनश्च तस्य रूपम्।

महाराज। अहो अनिर्वचनीयगुण-धाम मम गुरु!

महानसौ विज्ञतमो गुरुर्मे
धन्योऽस्मि शिष्यत्वमवाप्य तस्य।
तदीय-पाण्डित्य-विनिर्जितस्तु
दासत्वमङ्गीकृतवान् पुराऽहम्॥ २०९

प्रथमो राजा। तद्विषयक किञ्चित् श्रोतुमिच्छामि।

महाराज। राजन्, श्रूयतां कृपया। एकदाऽह अस्य पादयुगल सेवमान परमकौतूहलेनापृच्छम्—"देव! सत्य किम्? कृपया व्याख्याहि।"

द्वितीयो राजा। "पादयुगल सेवमान" इति किम्?

महाराज। बन्धो! तत्रैव गुरुदेवस्य महामाहात्म्यम्। मम गुरुदेवो मम राजसम्मानविषये सर्वदा सचेतनो वर्तते।

मा भूत् सम्मानहानिर्मम मनुजपतेरित्यभिप्रेत्य देवः
पादस्पर्शं सदीयं बहुजनसविधे नानुजानाति मह्यम्।
एकस्तस्मान्निशीथे परिजनरहितो यावदिच्छं पदाब्जं
तस्याहं सेवमानः सविनयमतुलं शश्वदाप्नोमि सौख्यम् ॥ २१०

प्रथमो राजा। अहो व्यवहाराभिज्ञता महात्मनो भवद्गुरुदेवस्य।

द्वितीयो राजा। किन्तु सत्यविषये किमुक्तं गुरुदेवेन?

महाराजः। तेन उक्तमासीत्—"महाराज! पूर्णसत्यम् एकमेवाद्वितीयम्। साधारण्ये यत् सत्यरूपेण परिगृह्यते तदापेक्षिकं सत्यम्। ज्ञानवृद्धिहेतोर्मानवः सत्यात् सत्यान्तरमनुयाति। भवतु नाम—यत्पत्कं तदसत्यमिति न यच्च परिगृहीतं तदुन्नततरमास्तां वा। तथापि परमसत्यस्योपलब्धिरनेन प्रकारेणासम्भव एव। सति परम-सत्यज्ञाने आपेक्षिक-सत्यज्ञानं लोपं याति।"

द्वितीयो राजा। अहमेतमुपदेशं श्रुत्वा अधुनैव तस्य पादयुगलं चिराय आश्रयितुमिच्छामि।

प्रथमो राजा। सत्यमेव महाराजो भाग्यवान्।

महाराजः। अहो मन्ये न कोऽपि मादृशो भाग्यवान्।

आसाद्यते कोटि-तपःफलेन
दैवेन तुल्यो गुरुरत्र लोके।
विश्वार्चितो यस्य गुरुर्महात्मा
श्रीरामकृष्णः परमो हि हंसः ॥ २११
वरिष्ठ-शिष्यः किल तस्य मे गुरु-
रयं महात्मा प्रतिपन्न-पौरुषः।
स्वदेशदृष्टिं विपरीतुमुत्सुकः
प्रतीच्यदेशं प्रति गन्तुमिच्छति ॥ २१२

राजगण! अशेष-गुणभूषितस्य मम गुरोर्विदेशगमनं भारतवर्षेतिहासस्य श्लाघ्यायरूपेण राजिष्यत इति न मे कश्चन सन्देहः।

प्रथमो राजा। विलायते कुत्र किमुद्दिश्य गमिष्यति गुरुदेवः?

महाराजः। आमेरिका-महादेशे चिकागोनगरे प्राच्य-प्रतीच्य-धर्मसभायां हिन्दुप्रतिनिधिरूपेण गमिष्यति मम गुरुदेवः। पश्यन्तु भवन्तः, तदर्थं सर्वा व्यवस्थापना कृतासीन् मद्देशवासिभिः। किन्तु,

महाराज । नाय विषयो मया चिन्तितपूर्व आसीत्। (सदीर्घश्वासम्) भवतु तद् वयमेव श्रोष्याम । भद्रे ! कुरु सङ्गीतम् । श्रीगुरुमहाराजस्य आगमनमभीप्सितमासीत् किन्तु न तत् सम्भवपरमास्ते ।

नर्तकी । (स्वगतम्) अहो नितरां मन्दभाग्यास्मि, यत् सङ्गीतमेकमपि परम-महिममण्डित वरणीयतम-सज्जन श्रीगुरुदेव श्रावयितु न समर्थास्मि । यदीत्थ भवेद् भगवद्विवचन, कथ महात्मानो निर्दिशन्ति—विश्वजनेषु न भेदविचार करणीय इति । (चक्षुर्निमील्य) भगवन् ! दूरे तिष्ठन्नपि राजगुरुर्मे सङ्गीत शृणोतु । भवतु, गायामि—

प्रभो न गणय दोषराशि मम
तारयावला मा समदर्शितया सर्वदोषहर ।
दोषे च गुणे भव सम ।
दव मम समदर्शि-नामधर ।
ब्रह्मात्मिकामिमा समुद्धर ॥ २१५
राजतेऽय खण्ड दवमूर्तौ दवमन्दिरे
राजतेऽय खण्डश्छुरिका घातककरे
स्पर्शमणि-स्पर्शनेनोभे समे स्वर्णरूपधरे ॥ २१०
दोषे च गुण भव सम
न गणय दोषराशि मम ॥ २१७
यमुनाहृदयशोभि पुण्यमधुर-जल
दूषितखातवाहि यदिद समल
गङ्गास्रोतसि जात पवित्र सकल
हर हर दोषान् मम सर्वदोषहर ॥ २१८
न भव देव मम दोषगणन-तत्परो
भव सत्य एव समदर्शि-नामधर ॥ २१६

महाराज । (स्वगतम्) अहो अवमानितेय नर्तकी करुण करोति सङ्गीतम् । अहोवत ! जागतिक-गणनया यत् सत्य, परमार्थ निर्णय-व्यापारे तद् भवेद्वा भिन्नरूपम् । सर्वथात्र गुरुदेवा मम प्रमाणम् ।

सर्वे । महाराज ! सुष्ठु गीत सङ्गीत भवदार्मन्त्रितयाऽनया । सुकण्ठीय ललना बहुगुणविभूषणा च ।

तस्याशिषा तनय एष यदस्ति जात
पादार्पण तदिह तस्य नितान्त-काम्यम् ।
मत्प्रेपितादिति निशम्य जनाद् गुरुर्मे
मद्गादिहोपगतवान् कृपया परीत ॥ २१३

द्वितीयो राजा। तस्य आशीर्वादक्रमेण पुत्रो जात इति किम् ?

महाराज । अहो राजन्, यदा भागवत जीवनमासीन्मे प्रारब्ध, तदाऽपि जागत-जीवन प्रति ममासक्तिरासीन्महती ।

प्रथमो राजा। अहो विचित्रा मनोवृत्ति । ततस्तत ?

महाराज । राजन्। को वा अत्र विस्मयस्यावकाश ? प्रवृत्तिभेदो मानवानां स्वाभाविक । पश्यतु भवान्,

पूर्व प्रसाद्य तपसा जगदम्बिका ता
प्राप्तौ समाधि-सुरथौ स्वमतौ वरौ द्वौ।
ज्ञान तयो समवृणोत् प्रथमो विरक्तो
राज्य परो हृतमयाचत भोगकाम ।। २१४

द्वितीयो राजा। तेन महाराज किं वक्तुमिच्छति ?

महाराज । एतद् ब्रवीमि, यद् अधिकारिभेदेन कामनाभेदश्चिरन्तन इति । ततश्च यदा जागती समासक्तिर्मा सन्तानलाभाय प्रोद्वेजयामास, तदाह श्रीश्रीगुरुदेव-स्वामिमहोदय पुनस्सन्तान लाभाय प्रार्थितवान्। गुरुदेवश्च तथा भविष्यतीति कृपयाऽवोचत्। श्रीश्रीगुरोराशीर्बलेन सन्तानश्च मया लब्ध । किन्तु नाह जाने काञ्चन परित्यज्य काचो मया प्रार्थितो नवेति। अथच तस्यैव कृपया सर्व सघटितम् । अनन्त विभूतिमयोऽसौ मे गुरुरद्य मया प्रार्थितो यदस्या नर्तकीश्रेष्ठाया सङ्गीत तेन श्रोतव्यमिति। आशासेऽचिरादेव देवो गुरुर्मे समायास्यतीति ।

(तत प्रविशति राजान्त पुरचारी कश्चन)

महाराज । (उत्थाय) अपि गुरुदेव समायात ? सर्वे वय गच्छाम-स्तस्य प्रत्युद्गमनाय (सर्वे समुत्थिता) ।

राजान्तपुरचारी । महाराज। गुरुदेव कथयति—मद्वचनेन महाराज ब्रूहि, सन्न्यासिजनो न नर्तकी-सङ्गीतसमाजे समुपस्थित स्यादिति ।

महाराज । नाय विषयो मया चिन्तितपूर्व आसीत् । (सदीर्घश्वासम्) भवतु तद् वयमेव श्रोष्याम । भद्रे ! कुरु सङ्गीतम् । श्रीगुरुमहाराजस्य आगमनमभीप्सितमासीत् किन्तु न तत् सम्भवपरमास्ते ।

नर्तकी । (स्वगतम्) अहो नितरां मन्दमाग्यास्मि, यत् सङ्गीतमेकमपि परम-महिममण्डित वरणीयतम-सज्जन श्रीगुरुदेव श्रावयितु न समर्थास्मि । यदीत्थ भवेद् भगवद्विवचन, कथ महात्मानो निर्दिशन्ति—विश्वजनेषु न भेदविचार करणीय इति । (चक्षुर्निमील्य) भगवन् ! दूरे तिष्ठन्नपि राजगुरुर्मे सङ्गीत शृणोतु । भवतु, गायामि—

प्रभो न गणय दोषराशि मम
तारयावला मा समदर्शितया सर्वदोषहर ।
दोषे च गुणे भव सम ।
देव मम समदर्शि-नामधर ।
ब्रह्मात्मिकामिमा समुद्धर ॥ २१५
राजतेऽय खण्ड दवमूर्तौ देवमन्दिरे
राजतेऽय खण्डश्छुरिका घातककरे
स्पर्शमणि-स्पशनेनोभे समे स्वर्णरूपधरे ॥ २१६
दोषे च गुणे भव सम
न गणय दोषराशि मम ॥ २१७
यमुनाह्रदयशोभि पुण्यमधुर-जल
दूषितखातवाहि यदिद समल
गङ्गा-स्रोतसि जात पवित्रा सकल
हर हर दोषान् मम सर्वदोषहर ॥ २१८
न भव देव मम दोषगणन-तत्परो
भव सत्य त्व समदर्शि-नामधर ॥ २१९

महाराज । (स्वगतम्) अहो अवमानितेय नर्तकी करुण करोति सङ्गीतम् । अहोवत ! जागतिक-गणनया यत् सत्य, परमार्थ निर्णय-व्यापारे तद् भवेद्वा भिन्नरूपम् । सर्वथात्र गुरुदेवो मम प्रमाणम् ।

सर्वे । महाराज ! मुष्ठु गीत सङ्गीत भवदामन्त्रितयाऽनया । सुकण्ठीय ललना बहुगुणविभूषणा च ।

नर्तकी । (क्रन्दन्ती) किन्तु वै नाम गुणा मम, यान् स्वय ब्रह्मसदृश सन्न्यासिगुरुर्महाराजस्य नाद्रियते ।

(तत प्रविशति स्वामिमहाराज । सर्वे स्वासनेभ्य उत्थितास्त नमस्कुर्वन्ति ।)

स्वामिमहाराज । अहो चित्तद्राविणी हे ब्रह्ममयि ! तव गीति । अनया सस्पृष्ट मम हृदयम् । यथोक्त सङ्गीतेऽस्मिन्, तथा ममापि मति । ब्रह्मात्मक जगत् सर्वम् । ब्रह्मेद स्थावर जङ्गमात्मक सर्वम्, ब्रह्मेय नर्तकी, ब्रह्माय महाराज । सर्व खल्विद ब्रह्म । प्रसारिता मम दिव्यदृष्टिस्तव सङ्गीत-महिम्ना ! सत्य धन्यासि त्वम् ।

प्रथमो राजा । भवत आगमनेन धन्या वय सञ्जाता ।

स्वामि-महाराज । परम-कल्याण भवतामाशासे ।

नर्तकी । (दूरात्) देवदेव ! सकृप प्रणामाञ्जलिं मम गृहाण । महिमाऽय सङ्गीतस्य । तव प्रसादात् लब्धा मयाद्य शाश्वतदृष्टि । सङ्गीतस्य मर्म ब्रह्म, तदेव मम चिरोपास्य भवतु ।

समुपस्थिता सर्वे । गुरुदेव ! महती नवेय शिक्षाऽस्माक सर्वेषा हृदयानि सुतरा स्पृशति ।

महाराज । भगवन् गुरुदेव ! समीपागता भवत पाश्चात्यदेश-गमन-समय । भारत-जननी अस्माक चिरमासीज् जगत शिक्षादानकर्त्री । भवता पुत्रवती सा पुनरपि स्वीयपदवी प्राप्स्यति । पुनश्चिन्तयाम — यस्या राजते भवादृश पुत्र कथ साद्य निद्रान्विता स्यात् ?

थमो राजा । सर्वे वय प्रार्थयामहे गुरुदेव सकाशे, स्वमहिम्ना विश्वमिद प्रोद्भासयतु गुरुदेव । शिष्या वय धर्मदेश-भारत-निवासिनो धन्यधन्या भविष्याम इति ।

स्वामि-महाराज । तत्र महिमा गुरुदेवस्य मम श्रीश्रीरामकृष्ण-परमहस-देवस्य । तस्य महिमान वय प्रोद्घोषयाम ।

(श्रीश्रीरामकृष्ण–स्तुति)

कोटि कोटि विश्ववासि-तप पुण्यफलम् ।
सर्वयुग-तपश्चय-प्रेमघन समन्वय
गरम्नों जगदेक-सवलम् ॥ २२०

धरणी सकल-धर्म-मर्मज्ञान-कृतकर्म
प्रभाव-बोधित-सकल-मण्डलम्।
जननीसाधन धारा–प्रसाद परपरा–
प्लावितास्खिल जलस्थलम् । २२१
कोटिशो वन्दे श्रीगुरुचारुपदकमल
कोटिकोटिविश्ववासि तप पुण्यफलम्॥ २२२

नर्तकी । (स्वगतम्) अहा महापुण्यफल मम—
दिनेश-कोटिप्रभयेव भासुर
तपश्चयोपार्जित दिव्य वैभवम्।
इम समालोक्य सुसौम्य-दर्शन
मनो ममोत्फुल्लतम प्रजायत॥ २२३
अपिच —
तप पुञ्ज समुद्भूत दिव्यालोक विमण्डितम्।
पुण्यकायमिम दृष्ट्वा श्रद्धे वोपैति म मन॥ २२४

(स्वामि-महाराजमुद्दिश्य) देव। श्रुत किल मया—पुराकाले श्रेष्ठतपस्विदर्शन प्रभावेण धन्या जाता काश्चन ललना यथा नामाचार्यहरिदास प्रसादनेन लक्षहीरा, या पश्चात् परमवैष्णवी सञ्जाता। एवमन्या अपि। "यमेवैष वृणुते तेन लभ्य" इति च श्रुतम्। तत् स्वय भगवान् नरविग्रहधर पवित्रपावन–नाममहिमविस्ताराय भामुद्धर्तुकामा मत्समीपमागत इति सम्भावयामि। भगवन्त गुरुदेव कोटिशो वन्दे।

स्वामि-महाराज।
भूयोऽपि वच्मि यदह महतो गुरोर्मे
छायैव तन्मम तत पृथगस्तिता का?
पुण्यप्रकर्षमथ वाञ्छितसिद्धिमिच्छन्
इष्टार्थद परगुरु स्मर रामकृष्णम्। २२५

सर्वे। भगवत श्रीरामकृष्णस्य जय।

स्वामि-महाराज। महाराज। सव सुष्ठु सघटितम्। मनो मे कथयति, इत पर मया विलायतगमने विलम्बो न करणीय। तदचिरादेव विदेश गमानुमति भवता सर्वेषा समीपे प्रार्थये।

महाराज. । गुरुदेव !

देवोऽभवन्मम यदा नयनाध्वनीनो
मग्नस्तत. प्रभृति दिव्यरसार्णवेऽहम् ।
मन्ये जगन्मधुमयं महिमोज्ज्वलं तद्
याचे भवानिह करोतु चिराय वासम् ॥ २२६

जगत् प्रतीयते परमानन्दमय महिममय मधुरिममय मधुमय मधुनोऽपि मध्विति। तत् प्रार्थये भवतामस्माकमन्तिकावस्थितिम् ।

स्वामि-महाराज. । किन्तु गुरुदेवसकाशे प्रतिश्रुतवानस्मि निखिले विश्वे तस्य धर्मदर्शनमतमवश्यमेव प्रचारित स्यादिति।

महाराज. । देव ! पुनरपि कृपया शृणु। स्वार्थपरवशोऽस्मीति भवांश्चिन्तयिष्यति तथापि किं करोम्यहम् ? यदा प्रभृति भवत्कृपाभाजन जातोऽस्मि, तत एव सौरकरस्पर्शेन कमल-दलानीव, सहस्रदलानि मम जीवन कमलस्य विकसितानि । गोमुखीमुखादारभ्य यथा भगीरथखातावच्छिन्ना भागीरथीधारा भारतवर्षस्योत्तर दक्षिणे दिशौ सयोज्य निरन्तर प्रवाहेण प्रवहति, तद्वत् भवदुपदेश वाणीखातावच्छिन्नास्मद्जीवनधाराऽपि वशपरपराद्योपान्तधारा मधिकृत्य , उर्वरीकृत्य च पुण्य-परिवार जीवनभूमिं सहस्रधा नितरां खरवेगेण प्रवहति । भारतमहासागरस्योर्मिमाला देशस्य सुखदु खानि सगृह्य दूरे बहुदूरे दूरतम-सुदूरे प्रसरति—तथापि निरन्तर-देशमातृका पदचुम्बन सार्थक्येन स्वक-जीवन सरक्षतीव ध्रुवम्। तद्वदस्माक भवद्भक्तानां जीवनोर्मिमाला सम्प्रसरन्तु नाम दिग्दिगन्त, किन्तु भवच्छ्रीचरणान्तिकतम स्पर्श विना कथ वय जीवित धारयिष्याम ?

[महाराजो रोदिति , राजगणोऽश्रुभारप्रपूरितनयन किञ्चिद् वक्तुकाम इव तिष्ठति , नर्तकी उच्चै रोरुयते]

स्वामि-महाराज । राजगण ! परम स्नेहास्पद महाराज ! मातरश्च ! शृण्वन्तु सर्वे ।

भूपा गुरो शतसहस्रगुणैर्गरिष्ठा
सा सारदामणि–महाजननीति मन्ये ।

जाने न कोमलतरं मधुरं ममत्व-
पूर्णं तदीयहृदयात् किमपीति वित्त ॥ २२७

एवंविधा मम जननी "पूज्यतम-गुरुदेवस्यादेशो मयाऽवश्यमेव पालनीयः, यावत्तत्सत्यं मया न परिपालयिष्यते तावन्नाहं स्वस्थानं प्रत्यावर्तिष्ये" इति मयोक्ते करुण-करुणमवलोकयन्ती मम शिरसि हस्तं निधाय मधुमाशिषो दत्तवती, न सा मदाशासिद्धिविषये कञ्चनान्तराय कृतवती। किञ्च, सन्देहपरं मनो मे सदा तस्याः कोमलतम-धन्यपादारविन्दं स्पृष्ट्वा स्पृष्ट्वेव प्रसरतीति हेतोः विदेश-गमनानुमतिं संप्रार्थ्य प्रेषिते च मया पत्रे सा पुनरपि मह्यं विदेश-गमनानुमतिं दत्तवती। ततः सोत्साहोऽहं गन्त्रामि बहुसमुद्राणां परपारे आमेरिका-महादेशे। युष्माभिरपि तथानुमतिर्देया।

नरेश तव मानस मधुर-कोमलं वेद्म्यहं
तथापि तव सन्निधौ मम मनोरथं वेदये।
उपस्थितविधेर्विदन्ननतिलङ्घ्यतां सर्वथा
विधूय विरहव्यथां भजतु सौमनस्यं भवान् ॥ २२८

जननी जगदीश्वरी विश्वपालयित्री सर्वेषां मङ्गलमवश्यमेव विधास्यति।

महाराजः। (अश्रु प्रमार्ज्य) देव ! यदि जगदम्बिका स्वयं दत्तवत्यनुमतिं, कथं वयं बाधा भवामः ? केवलम् एतदेवास्माकं सर्वेषां संप्रार्थनम्—

समाशास्या देवैरपि भवतु ते सिद्धिरतुला
निरामं माहात्म्यं प्रसरतु भवे भारतभुवः।
विरोधो भ्रातॄणां प्रशममुपेयात् प्रतिदिशम्
अविच्छिन्ना शान्तिः पदमुपनिधेयादिह दृढम् ॥ २२९

गुरुदेव ! लोकहितस्य मम उपान्तिके विरले क्षुद्रतम प्रार्थनम्।

स्वामि-महाराजः। यथेच्छं ब्रूहि महाराज ! न तुभ्यं किञ्चिदपि ममादेयमास्ते।

महाराजः। तदहं जाने, ततो ब्रवीमि—

यानङ्गीकृतवान् पुरा "विविदिषानन्द" इति-नामोच्चयान्
आर्यस्तानधुना जहातु सकलान् नामोज्झितास्ते हि मे।

अद्यारभ्य विराजतामिह "विवेकानन्द"नाम्ना भवान्
इत्येषा भवदङ्घ्रिपङ्कज-युगे मूर्ध्ना मम प्रार्थना ॥ २३०

स्वामि-महाराजः। एतदेव ? अहो अत्यल्पमेतदमीप्सितम् ! निश्चितं तद्भविष्यति।

महाराजः। ततो विवेकानन्दरूपेण देव ! भवान् भारतजनन्याः शाश्वत-धर्माधर्म-विवेकं प्रचारयतु।

यत् सत्यमेतन्निखिले धरातले
धर्मारुणः प्रागुदियाय भारते।
युष्मन्महिम्ना पुनरद्य भारतात्
तद्भानवः संप्रसरन्तु सर्वतः ॥ २३१

विजयी चिराय भवतु परमगुरुः श्रीपरमहंसदेवः, जगद्विजयिन्यास्ता जगद्धात्री महामाता श्रीश्रीसारदामणिश्च।

स्वामि-महाराजः। महाराज ! अतः परं कमपि उपकारं महाराजस्य भवतां सर्वेषां चोपस्थितानां कर्तुं पारयामि ?

राजगणः। भवतामाशीर्वाद एव श्रेष्ठ-संबलं स्वामि-महाराज !

स्वामि-महाराजः। प्रार्थये तथापीदमस्तु—

अगौरवं दूरमुपैतु भारताद्
उदेतु मातुर्वदने स्मितद्युतिः।
कराश्च मातुर्वितरन्तु मङ्गलं
विभातु वेदध्वनिपूरितं जगत् ॥ २३२

॥ समाप्तं द्वादश-दृश्यम् ॥

—०—

BHARATIYA VIDYA BHAVAN LIBRARY

॥ समाप्तश्चायं ग्रन्थः ॥